गो॰न॰ ३३ नाभावानाल स्प्रगोयाविषयइप्रकोणाद्दिमर्थः॥ अथमाहाय:॥ एवमादिसुखस्यापि गृहु विन यण्या छान्वानाणानभीता
द्दिजमतु:स्वांताद्दितलानाविनाद्दि लेनो जाकालकदु:खहलत्वात्।।मधुविषसंपृक्तान्नभोजनजमनस्विनतावहुन्।दु:
६६ खानुविद्धत्वात्किं पुनरामेषांवैषयिकसुखानांदु:खबहुलत्वात्। यान्नेषुवकदुन्याणप्रहारपाथ्या नगारवियोगकाललमजन
स्वजलपानजमसुखवत्वैषयिकसुखिसुखानस्यानुरागाणि ताम्रपत्रस्य सुभगाविनमानीप्रयारगाभिवाणातत: सु
खबोध:॥ नयावधेशुद्धिकिन: सुखमात्रलिप्सावेदुखभाव:। शिर:श्वद्दंध्रे नवनितमहाभवनुपहारगमनं वौर्यगा क
र्ले धमवेतमध्य कस्यापिनोरागाधा: नेनसु न्मसुणावभूतकर्मस्वनधिकारिणा भवमनुवहुजन्माराधितभावकृपयाद्:खेइय
स्मिन्दि सुखेविवैराग्यं॥ सएवमोक्षोपायसाक्षात्कारकारणेषुनिष्कामकर्मसुप्रवर्गमनस्नाहेतुक्रवनीत॥ नसपडकेव
लदु:खाभावार्थिनोदु:खाभावइशायां सुखंनास्तीति यत्नेनप्रवृत्तिप्रतिबंधक:॥ यथाग्रामज्वालीनमध्येइनमांतेडश
उक्तिरागप्रानामस्य वहुदुरानीतानुमानानेसभागाणकस्मैवाइनुपछायमानाशशिशिर्विषो:सुखुमोभोजनया ना राम
द्दिकं नोत्सानिश्चानेनप्रवृत्तिप्रतिबंधकेतस्तान्नगएवसुखापेक्षयादु:खाभावस्यापेक्षाभावइपेक्षितत्वात्॥ मोक्षस्य ३३

रमपुरुषार्थत्वमिति संक्षेपः ॥ ४ ॥ अपवर्गो मतिप्रकाशं इच्छति ॥ मनुजीति ॥ कथं केन प्रकारेण मघत इत्यर्थः ॥ ५ ॥ शास्त्रादि
ष्टेनेन गुरुणा श्रुत्यादि शास्त्रसुजनसंगत्या माहशीत्यं ॥ ननु कं श्रोतव्यः स्मर्तव्यो मन्तव्यः श्रोतव्य इति सिद्धिरिति ॥ सिद्धिर्हि नेन
नेन मननं दर्शितं ॥ अत्र च पाप्मा अहंतोऽमिथमे ॥ ज्ञानात्कर्तृत्वाद्यनुमानेन पक्ष प्रतिपादनाय परमात्ममति पाद क
श्रोतान्तं प्रयोजकत्वं शास्त्रादिति ॥ ६ ॥ सम्पादयति ॥ सर्वप्रमेयाभिति ज्ञातन मतेपिन तत्त्वज्ञानमिति तत्त्व पदमशो षडिशे
षहपेणात् ज्ञानत्वाभावोऽविषयेत्वादि नामोक्षस्य साधिकारादर्शितः ॥ अन्यथा विषयरामलेमो क्षोपायकर्मस्वपह ते ॥ ७ ॥ ध्या
यिनो निदिध्यासं कुर्वनित्यर्थः ॥ ध्यानवशपरिपाकः फलं योगजधर्मरूपं ॥ तत्र शान्तात्मा प्रलीनात्मा नोऽज्ञात्मपरमा
त्मानो येन सत तथा तस्मै इत्यर्थः ॥ ८ ॥ मया तस्मै तत्त्वज्ञानमेव मुक्तिप्रतिकारणं न मे वाणीहित्यातिम् स्मेयेति परमात्मप्रकाशा
यश्रुतेः ॥ आत्मानं चेद्विजानीयादयमस्मीति पूरुषः ॥ किमिच्छन्कस्य कामाय शरीरमनुसंज्वरेदिति जीवात्मणश्रुते
श्च ॥ तत्र परमात्मसाक्षात्कारो योगधर्मः प्रणामतिः ॥ जीवात्मसाक्षात्कारेऽपि च मनः संयोगाख्ये ॥ तथा पनीद्रियका
लो कासादिभि अन्यसाक्षात्कारो न योगजधर्मजनितेति ॥ न चापि न दैवेशाक्लिष्टेति भक्तिरूपते संसारयानतानुभवः ॥ कि

गी.त. पतेय्यनेनेतिकेशः॥ सकारणमिथ्याज्ञानं तद्दूरितत्वेन तथा च यथाशक्ति तत्त्वज्ञाननिरोपि शाद्धकर्माधीनतुः स्याद्सं
२५ यतेः॥ निष्कामकर्मेति॥ सा च प्रकृता स्मदुक्तचहेतुत्वेनान्वितं॥ कामफलकामना॥ तद्दूहितानां यागस्यानर्थविहि
67 तानां कर्मणामात्मशुद्धिद्वारा तत्त्वज्ञानं प्रतिहेतुत्वात्॥ काम्यनिषिद्धकर्मणी तु स्वर्गादिफलजनकत्वेन तत्त्वमि
बंधकतया मुमुक्षुभिर्वर्जनीये अत्रैवं क्रमः॥ फलकामनां विना भगवदर्पणबुद्ध्या कृतैः कर्मभिः पापक्षयद्वारात्मशु
द्धिर्भवति॥ ततो विषयेषु वैराग्यं॥ ततः श्रवणादौ प्रवृत्तिः॥ ततः श्रवणादिकर्मणा तत्त्वज्ञानोत्पत्तिः॥ ततः सकारणमिथ्या
ज्ञाननाशः॥ प्रारब्धेतरपूर्वकर्मनाशश्च॥ ततः प्रारब्धकर्मणां भोगादेव क्षये सति मिथ्याज्ञानाभावात् न कर्मोत्प
त्त्यभावेन मोक्षसिध्यतीति॥ ननु तत्त्वज्ञानं विना विहिताचरणं काशीमरणं तु लापुरुषहानादिकर्मणां साक्षान्मोक्ष
हेतुत्वं श्रूयते॥ तत्कथं कर्मणां तत्त्वज्ञानोपयोगित्वमुच्यते॥ तस्मात्समुच्चयनिष्ठतां तत्कर्मादिनाशतावच्छेदक
त्वेनात्मकत्वान्नात॥ प्रोहितियवषत॥ ज्ञानकर्मणोर्मुक्तिहेतुत्वेऽपि कल्पमिति चेन्न॥ संसारमूलकारणानादिसकारणमि राम
थ्याज्ञानस्य तत्त्वेन मोक्षहेतुत्वात्॥ तस्मात् संतिकोष्ठे हेत्वन्वयव्यतिरेकाभ्यां मध्यगतकारणतानां तत्त्वज्ञानमेव कर्मस्थले २५

प्रिकल्पते॥ अतएव तमेव विदित्वातिमृत्युमेति नान्यः पंथा अयनाय विद्यते इति श्रुतिरपि तत्त्वज्ञानं अघटितमो
क्षसामग्री नान्यानीति प्रतिपादयति॥ अतिमृत्युमिति॥ मृत्युमयमेति मृत्युप्रवाहे न पतति देहान्तरं न लभत इत्यर्थः
॥ अतिमृत्युपदस्य मोक्षे वा लक्षणा यस्तु ज्ञानेन मुच्यन्ते प्रयागमरणेन वा॥ अथवा ज्ञानमात्रेणापि मोक्षं कृ
क्षसंनिषेधति चेत् न॥ तस्यायमर्थः॥ चिरकालाभ्यासेऽपि न मननादिकर्मणो मोक्षः किन्तु तत्त्वज्ञानेन मुच्यते॥ प्रय
गमरणेन प्रयागमरणज्ञानेन शीघ्रो मोक्षे न तत्त्वज्ञानेन मुच्यन्ते॥ एतदभिप्रायेणाहापि विवेकध्यानमिति संक्षेपः॥ ननु
नहि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृदिति न्यायेन सार्वदैव धर्माधर्मोत्पत्तिसंभवात् तेषां च भोग
जनकत्वात् सदा भोगस्य कथं मोक्ष इत्यत आह॥ अनागतेति॥ अनर्जितेत्यर्थः॥ अर्जनपतन इत्यर्थः॥ धर्मकारणी
भूतस्यासत्त्वस्य नित्यत्वाभावादिति भावः॥ तत्त्वज्ञानान्प्रारब्धेतरकर्मणां नाशः प्रारब्धकर्मणां तु भोगादेवना
श इति दर्शयति॥ पूर्वोपात्तेति॥ प्रारब्धेत्यर्थः॥ योगप्रभावेति स्वरूपकथनमिदं॥ कर्मभोगेन तत्त्वज्ञानस्यानेप
क्षितत्वात्॥ समाहृत्यापीति समन्तात्क्षेति पाकत्वा॥ रागद्वेषादिति शेषः॥ सुखभोगे रागवान् दुःखभोगे द्वेषं

गी.त.
३५
६९

णोऽदृष्टेतिभावः॥ तदुक्तमप्रमेयात्मकोऽदृष्टिप्रभुक्त इति॥ शरीरारंभकादन्यत्र पूर्वकर्मणि ज्ञानेऽर्हेतुत्वं बोध्यं॥ एवमपूर्व
शरीरारंभकादेरपि तस्य हेतुत्वं अत्र देहं तत्वं॥ कर्मनाशबहुविधं॥ प्रारब्धमप्रारब्धं च॥ अत्रापि प्रमाणे शरीरारंभकं कर्म प्रा
रब्धमितिकथ्यते॥ तद्भिन्नमप्रारं॥ नानुक्तं क्षीयते कर्म कल्पकोटिशतैरपीति स्मृतेः प्रारब्धकर्मणां त्वं॥ अथाप्रायश्चि
त्तादिविधिवैफल्यापत्तेः॥ तत्र च शास्त्रबोधितनाशकानाशप्रनाशत्वं भोगकार्यतावच्छेदकं॥ तत्त्वज्ञानस्यापि कर्मना
शकत्वं शास्त्रबोधितं॥ क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे इति श्रुतेः॥ ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरु
ते इत्यादिस्मृतेश्च॥ इदं च प्रारब्धेतरकर्मणां॥ प्रारब्धानितानां तत्त्वेऽप्यस्त्येव नानामपि भोगाच्च ज्ञानात्तानि नप्राय
श्चित्तविधानतुपपत्त्या प्रायश्चित्तानाशप्रणापमात्र नाशकत्वमस्तु भोगस्य तत्त्वज्ञानस्य तु कायव्यूहोत्पत्तिद्वारा भोगद्वा
रा च कर्मनाशकत्वमिति विवेचं॥ कायव्यूहभोगयोऽनतत्त्वज्ञानव्यापारत्वे मानाभावात्॥ तत्त्वज्ञानं विनापि सौभर्यादेः का राम
यव्यूहदर्शनात्॥ तस्मादंते न सर्वथापि दृष्टदर्शितत्त्वं नाहि कल्पकोटिभुक्तमिति स्मृते प्रारब्धमात्रफलत्वे तत्त्वज्ञानिनो नि ३५
खिलकर्मभोगार्थं कायव्यूहकल्पनमप्रामाणिकं॥ अथ सर्वथा कल्पांतरस्थापि कलजनकप्रारब्धनकर्मणः प्राशीम

रणाद्दै नन्वेतानानन्॥ कायव्यूहज्ञानेपि नादृष्टफलानुभवनेः तत्काले मोक्षप्रसंगात्॥ यद्दिकाशासरोन रमवि
भेदेव पाननाभवतीति प्रमाणाभावात्कं तद्दानद्दृष्टिविशेषाद्ध्रुव तत्तत्त्वज्ञानाद्यनाशयमिति कल्पनीयमिति द्दिक्॥ कायशोधनि॥
शरीरादिद्दिरूपकारणाभावादित्यर्थः॥ उपसंहरति सोयमिति॥॥ प्रमेयपदार्थान्निरूप्य संशयपदार्थं निरूपयितु
माह॥ इदानीमिति॥ एकस्मिन्निति॥ इमौ स्थाणुपुरुषाविति निश्चये स्मृतिव्याप्तिवारणाय एकस्मिन्निति॥
सत्यमान्विशिष्यलाभः स्थाणुर्द्रव्यमिति निश्चयवारणाय विरुद्धेति॥ अयं पुरुष इति स्थाणुविशेष्यकनि
श्चयवारणाय नानेति॥ तथा चैकधर्मिकविरुद्धनानाप्रकारकज्ञानत्वं संशयत्वमिति लक्षणार्थसिद्धं॥ अयं स्था
णुर्वा पुरुषो वा समस्तानामिति नाहार्यायां स्मृतिव्याप्तिवारणाय ज्ञानपदं॥ प्रकारान्तरमेदानाह॥ स चेति॥ तत्र साधारणध
र्मदर्शनजं संशयं दर्शयति॥ एक इति॥ साधारणधर्मत्वेनोपि विशेषदर्शनदशायां संशय इति दर्शयति तत्वं ने
न विशेषदर्शनं एककोटिव्याप्यदर्शनं एवमग्रेपि॥ समानधर्मेति॥ उभयकोटिसहचरितधर्म इत्यर्थः॥ विशेषद
र्शनस्य तं दर्शयति॥ स्थाणुत्वनिश्चायकमित्याहि नाय॥ समानधर्मदर्शनमाह॥ स्थाणुपुरुषयोरिति॥ किमयमि

गौ. त. ३६ 69

ति॥ अत्र स्थाणुत्वस्थाणुत्वाभावपुरुषत्वतदभावप्रकारकत्वं चतुःकोटिकसंशयोऽयं स्थाणुर्न वेति उभयकोटिकः विप्रतिपत्ति
जन्यस्तु उभयकोटिक एव संभवति॥ कोट्यन्तरोपस्थापकाभावादिति बोध्यं॥ कोटिः विशेषणं॥ विप्रतिपत्तिजसंशयमाह॥ द्वि
तीय इति॥ विरुद्धप्रतिपत्तिर्यस्मात् सा प्रतिपत्तिः विप्रतिपत्तिः शब्दः तज्जन्यो विप्रतिपत्तिजः शब्दप्रमाणेत्यर्थः॥ कोटि
द्वयोपस्थितिद्वारा विप्रतिपत्तेर्जनकता एकोऽपरः स्मरणलक्षणं॥ शब्दो नित्यो न वेति मध्यमस्य विप्रतिपत्तेः
संशयजनकत्वात्॥ अपरस्त्वापि वृत्त इति पूर्वोक्तानुषंगः॥ तृतीयमाह असाधारणेति॥ अन्यत्र हीन कोटिद्व
यसहचारको धर्मोऽसाधारणस्तज्ज्ञानजन्य इत्यर्थः॥ असाधारणत्वं साधारणत्वं द्रष्टव्यमिति॥ नित्यानित्यव्यावृत्तेति॥
व्यावृत्तेनेत्यस्य तद्वृत्तित्वरूपव्यापकत्वं तदाश्रयत्वेनेत्यर्थः॥ एतस्य धर्मस्यानित्यानित्यव्यावृत्तत्वाभावात् तत्संश
मानं तस्मिन्प्रयोजनपदार्थमाह॥ येनेति॥ येन प्रयुक्तो यद्विषयेच्छावानित्यर्थः॥ तेन प्रयोजनप एम
दस्य योगार्थो दर्शितः॥ प्रयुज्यते स्वोपायप्रवृत्तेन पुरुषो जनेनेति प्रयोजनं॥ तन्नीयार्थस्य ज्ञानजन्येच्छाज ३६
न्यत्वं॥ तथा च यद्विषयकत्वात् ज्ञानजन्येच्छाजन्यपुरुषप्रवृत्तित्वं प्रयोजनं॥ ज्ञानं चेष्टसाधनताविषयकं बोध्यं॥ तेन

गोचरत्वेति व्याप्तिः स्वरूपं दर्शयति ॥ नन्वेवेति ॥ सुखेवेति ॥ सुखावगाहि दुःखहानिश्चेत्यर्थः ॥ सुखदुःखाभावयोरेव सु-
खत्वप्रयोजनत्वं ॥ नन्दुःखाये तु गौणत्वमिति भावः ॥ लक्ष्येति लक्षणं प्रयोजयति ॥ नन्वर्थो हानीति ॥ तल्पकान्तादिस्थले सुखाति-
शयित्वे केशाद्यनुपहतिः दर्शनीनं आहो स्वस्त्वस्येति ॥ स्वरूपं शेषोऽर्थः ॥ तल्पेनं तल्पवत्कान्तादिस्थले पि तात्का-
लिकदुःखनिवृत्तिसंभवतीति ॥ कालकोऽप्यनागतानां दुःखसाधनेककर्मणां सुखजनकत्वमप्यत्र माहेत्यवहतिमिति स्वभेषमा ॥
दृष्टान्तपदार्थं निरूपयति ॥ व्याप्तीति ॥ संप्रतिपन्नाभिसंप्रतिपत्तिः ॥ सा च साध्यसाधनवत्तया साध्याभाववत्साधना-
भाववत्तया वा निश्चीयते नैकत्रोपादानेनान्यदृष्टान्तेनाव्याप्तिः ॥ तथा च पक्षप्रकृतानुमितिजनकीभूतस्तानविषय-
व्याप्यव्यापकरूपसंबन्धनिरूपकसंबन्धविशिष्टत्वेनोभयवादिसंमतत्वं दृष्टान्तत्वं ॥ सर्वस्मिन्प्रमेयत्वेन अन्वाह इति
व्याप्तेः प्रकृते वह्निमान्धूमादित्यत्रायोगोलकस्य दृष्टान्तत्वव्यायोगाय पद्ये ॥ आत्मानित्यो द्रव्यासमवेतद्रव्यत्वा-
दित्यादौ शब्दस्य दृष्टान्तत्वावारणायोभयवादीति ॥ अत्र मीमांसकमते एकदेशदृष्टान्तस्य निरस्तत्वं नैयायिकमते इति
नातिव्याप्तिः ॥ साधर्म्येति ॥ अन्वयव्याप्तिनिरूपकसाध्यसाधनवत्त्वान्नित्यर्थः ॥ वैधर्म्येति ॥ साध्याभाववत्साधनाभा-

९६

गौ.त.
३७
70

वकानीत्यर्थः ॥ अत्र साध्यवैकल्यं साधनवैकल्यं तूभयसंमतत्वं चेति त्रयो दोषाः प्रथमस्य साध्यवत्त्वं साधनवत्त्वं तूभ-
यसंमतत्वं चेति त्रयो दोषाः द्वितीयस्य दृष्टान्तस्य कोट्याः ॥ तथा च अत्र स्वमतमात्रसिद्धत्वेपि न त्रयोपयं प्रतितन्त्रसा-
धनोपं भवति तत्र साध्यांगकदृष्टान्तेन दोषद्वयपि कोट्यां ॥ यथा वौद्धानां सत्वेन क्षणिकत्वे साध्ये घटो दृष्टान्त इ-
त्यादिकमूह्यं ॥ सिद्धान्तपदार्थं लक्षयति ॥ प्रामाणिकेति ॥ प्रामाणिकत्वं प्रमितत्वं प्रमाविषयत्वमिति यावत् ॥ तृ-
तीयार्थः प्रकारता ॥ तथा च प्रामाणिकत्वप्रकारकनिश्चयविषयोर्थः ॥ प्रामाणिक इदमिति निश्चयविषयोर्थः सि-
द्धान्त इत्यर्थः ॥ तादृशनिश्चयविषयीभूतपदार्थस्यैव सिद्धान्तत्वमिति मतानामिणायेरणाभ्युपगतोर्थ इत्यर्थकं मूले ॥ तल्ल-
क्षणे ॥ ज्ञानमेवात्र सिद्धान्तः ॥ अत एव इदममुकसिद्धान्त इति व्यवहारोपि ॥ ननु अमुकसिद्धान्तः प्रमितिविनिश्चयपक्षा-
त्मकप्रमासाधारणोऽयं धर्मः ॥ तेन नानाशब्दे नित्यत्वानित्यत्वादिनोभयमतसिद्धान्तताहानिः ॥ सर्वशास्त्रे प्रामा-
णिकत्वाभ्युपगमस्सर्वतन्त्रसिद्धान्तः ॥ धर्मिमात्रेति ॥ धर्मिमात्रस्य घटादेः सर्वतांत्रिकैः प्रामाणिकत्वाभ्युपगम- राम
मादिति भावः ॥ धर्मस्य घटत्वादेः वैशेषिकैर्द्विषिरं नाङ्गीकारान्मात्रपदं ॥ द्वितीयपद इति ॥ अन्यशास्त्रे निराकृतस्यार्थस्य ३७

स्वशास्त्रसुप्रामाणिकत्वनिश्चयः प्रतितंत्रसिद्धांतः ॥ यथा प्रमाऽयोग्यव्यवच्छेदाद्दृश्यप्रमाणत्वं नैयायिका
नां तदसत् ॥ स्वतंत्रेऽपरसिद्धो योऽर्थः परतंत्रेऽनिराकृतः ॥ प्रतितंत्रोऽपि यथा न्यायेन सर्वतंत्रस्य प्रमाणानेनेति । मनइ
द्रियस्वमणुपरिमाणसिद्धांतो न्यायहारिणां कोऽधान्ते तदसत् ॥ मीमांसितं परतंत्रेऽपि स्वतंत्रेऽधिकं तन्निश्चयः ॥ मनसोऽणुपरिमाणमेव न्या
येमनस्तोऽनुमितिर्विद्येति ॥ स्वतंत्रेऽनिषिद्धस्य परतंत्रेऽपरस्य प्रामाणिकत्वेनाणुपरिमाणमणुपरिमाणसिद्धांतः तदुक्तं
मानार्थैः ॥ परतंत्रेऽपाकृतः स्वतंत्रे वानिषिद्धो योऽर्थोऽणुपरिमाणमन इति ॥ उक्तं न्यायपकारे भावप्रसंगो ॥ वैशेषिकमते च अणुपरि
माणसिद्धांतसिद्धत्वादिति ॥ न्यायमते प्रतिपादितस्य भावस्य वैशेषिकमते च अणुपरिमाणसिद्धांतत्वादिति भावः ॥ तथा चात्र
प्रतितंत्राणुपरिमाणसिद्धांतयोः भेदरामेनोऽनाहहरणाम्रहर्शनत्वंगंथकारास्य अमकिंजरंभिन्नमितियेवद्भुतिते नस्यापि सा
ये न जानंति ॥ तथाहि प्रतिशहस्य समानार्थकत्वेन समानतंत्रसिद्धांतस्य प्रतितंत्रसिद्धांतः ॥ अत एवोक्तं ॥ नहि समान
तंत्रेऽ इति ॥ भवदुक्ताणुपरिमाणलक्षणमेव ॥ तत्र संप्रमाणं ॥ तथा च मनइत्यादिकं तस्योदाहरणमुचितमेवैतदणुपरिमाणमः स्व
शास्त्रसूत्रेणनपरशास्त्रसूत्रस्य यथा न भवदुक्तप्रतितंत्रलक्षणमेकाणुपरिमाणलक्षणमिति ॥ एवं च मे गणाभिसर्वतंत्राधिकरणा

तो.त. ३८
21

मुपगमेत्याहि सत्र सद्धेतूनां व्याख्यानसंगच्छत ॥ साधनत्वेषी हेतावहेतौ शीता इति ग्रन्थकाराशयः ॥ न्तनीय इति ॥
वस्वधर्मितावच्छेदलं साध्यासिद्धिरुपाप्रामाणिकत्वाप्रामाण्योधिकरणमसिद्धान्तः ॥ सर्वशास्त्रमिति ॥ सर्वशास्त्राणां जीवा
नां शिरोगामित्वात् आकृष्य समाहारतयाउपाद्दानेगोचरणत्वे स्मानचिकोर्षा हेत्वाभासानां श्लिष्टत्वात् दोषत्वेन बाधेनाशरीरः
सर्वत्रैः कर्तव्यायामिति तो यमधिकरणमसिद्धान्तः ॥ चतुर्थ इति ॥ अप्रमाणमसिद्धान्त इत्यर्थः ॥ ग्रन्थकारमते एतत्क्रमस्य
तुल्यवाचानमनोनुकूलप्रतितं च सिद्धान्तलक्षणमेव ॥ जयविनायकोक्तेति ॥ मत इति शेषः ॥ यद्यात्रत्योन्मिमाकृतेर्योक्तिः ॥ किं
चिदभिप्रायं प्रकाशयति ॥ तावच्छेदकेन गुण इति ॥ नञ्समासयुक्तपरमुत्थः ॥ नकारशून्यपाठे तु संभावकारलोपात् गु
णोगुणाभिन्न इत्यर्थः ॥ अन्यथा मीमांसकमते शब्दस्य द्रव्यस्य गुणत्वाभावादसंगतेः ॥ तथा च मीमांसकानां स्वशा
स्त्रमात्रस्याप्रामाण्यापातेन स्वशास्त्रे गुणभेदस्याप्रामाणिकत्वाप्रमाणमात्रमप्रमाणमसिद्धान्त इति भावः ॥ तथा च शब्दस्य गुणा
भिन्नत्वे सिद्धे नित्यः शब्दः श्रावणत्वान्तर्भावविषयत्वात् ॥ शब्दत्ववदित्यनुमाने नैयायिकैर्हेत्वाभासे नित्यगुणाभिन्ने त राम
स्योपाधेः साधनव्यापकत्वेनानुपाधित्वात् रूपानुमानाद्देवशब्दस्यानित्यत्वसिद्धेर्भविष्यतीति मनसि कृत्वोक्तं नित्यताति ३८

त्येत्याद्यपि तु गोवर्धनेनोक्तं॥ अत्र मीमांसकैरुदाहरणान्तमुपनयान्तमस्य सर्वतंत्रसिद्धांतत्वाद् इत्यादिनाऽवयवत्रयमिति तर्कभाषाका
रोत्र्यांते इत्याह तत्त्वस्यैव संधावकाल्लोपस्तानाभावेन त्र्यांतत्वप्रकाशनाय॥ शत्रुस्यइयत्वनादिनो मीमांसकस्यानु
दाहरणान्तमुपनयान्तोत्तुडजिहि क्षमायेनेतिव हन्नूवलम द्वोपिसंध्यांशे त्र्यांतत्वका॥ शत्रूस्यानुदाहरणान्तमुपनयमस्मिमीमांसकम
नेसिद्धांतत्वाभावात्॥ प्रकृतोदाहरणान्तत्वासंभवात्॥ निम्नानिम्नेत्यादेहेत्वन्तप्रत्तापतुल्लत्वापतेश्च॥ नस्मात्संधावपि
त्र्यांतस्यग्रंथकारोत्र्यांत इतिव वनेहि अनासिकस्य दर्शयाहो बोध्यावनतुल्लमिवोध्यं॥ अवयवव हार्थेनिहृपयति॥ अ
त्रानुमानवाक्येनेनेन न्यायदुक्तः॥ न्यायवाक्यं पंचप्रकृतपक्षसाध्यवैशिष्ट्यपरमप्रकृतहेतुपरप्रकृतव्याप्तिपरप्रकृतपक्ष
धर्मितापरप्रकृतसाध्यहेत्वबाधितत्वासत्प्रतिपक्षितत्वपरवाक्यपंचकसमुदायः॥ तानि चवाक्यानि प्रतिज्ञादिनामिपके
कपरप्रहां तप्रतिपाद्यएकसाधान्यहेत्वादिघटितपंचत्वादिघटितत्वं चावाक्यातिव्याप्तिवारणाय प्रकृतपदानि॥ प्रतिज्ञा
द्यवयवपंचकसमुदायइत्यके प्रतिज्ञादिलक्षणानामन्यायावयवत्वघटितत्वादन्योन्याश्रयापत्तेः॥ समुदायइत्येकैका
वयवे अतिव्याप्तिवारणाय॥ एकैकपदशद्धांतर्भावानुणदानेनत्वइत्यवगतिः॥ इत्यावयवचतुष्के अतिव्याप्तिवारणाय

गो॰ त॰ ३८

प्रशब्दं न मानं पंचकोपादानं ॥ न चावैतादृशन्यायप्रयोगस्यानुमानस्य परार्थानुमानोपयोगितावच्छेदकसमुदायस्यैकदे
शावयवका इति यथाश्रुतं व्याख्यार्थः ॥ यद्वा वाद्यप्रतिज्ञावयवाद्यभिहितपक्षस्यैवैकदेशोऽवयव इत्यादिभागो व्युत्पत्त्यामात्र तथाप्यवयवो
हि मानन्यूनाधिक्याद्यवयवव्यवहारितं न भागो व्युत्पत्त्या मांत तथापि नोपलक्षणासमुदायपदं हित्वा मात्रानतीतत्वे सतिनादर्शक
पंचकामतमत्त्व अवयवत्वं ता च ॥ उदाहरणानन्तरं व्युत्पत्त्या निगमनादरणायसन्नं तं ॥ अवयवस्यैकदेशाहृतावयवं दृष्यहृतावानु
पूर्व्यं इतोऽकपंचकामनतमेव इति नातिव्याप्तिरिभदा वादिशिरोमणिरिदर्शितराजपथानुसारी सोऽलंकृत्यः ॥ अवयवगतो मतं त
दिभेदप्रदर्शनायाहा निवेति ॥ प्रतिज्ञां लक्षयति ॥ साध्येति ॥ साध्यहृतो यो धर्मः तद्विशिष्टो यो धर्मी पक्षः तन्मतिपादक मित्य
र्थः ॥ अत्राप्युदाहृतेन काक्येनातिव्याप्तिवारणाय मात्रांतर्गतत्वे सतीति देयं ॥ उपनये व्युत्पत्त्यातिव्याप्तिनिवारणाय साध्येति ॥ उदाहरणेऽतिवारणा
यन्नकं तर्गततत्वेऽपि साध्ये धर्मिपदं पक्षतावच्छेदकावच्छिन्नपरं ॥ उदाहरणं तन्मते निगमनिगमने न बोधो न तु उपनयेनो निगमानिनि भवति
तद्वारणं ॥ धर्मिपदं च साध्यतावच्छेदकसंबंधेन वैशिष्ट्यपलायाप ॥ तेन वह्निमान्पर्वत इत्यपरोपाधिंतो वह्निमानिमान्हो नाति व्या
प्तिः ॥ तथा चावयवत्वे सति साध्यानुपस्थितपक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतावच्छेदकावच्छिन्नवैशिष्ट्याव राम ३८

गाद्विशानजनकत्वाथावच्छेदकत्वं प्रतिज्ञात्वमिति लक्षणं बोध्यं ॥ निगमनवारणाय अनुपदर्शितमेव तत्र पक्षतावच्छेदका
वच्छिन्नविशेषणं ॥ तस्माद्वह्निमानिति निगमनस्य तु तथा न यथाप्रतिज्ञायां वह्निसंनिधानादेव पक्षविशेषकं
ना इत्याबोधजनकत्वमिति निगमनस्य तु तथा नास्मिन्प्रवनातिव्याप्तिः ॥ पर्वतो वह्निमानित्यत्र इदं गह्निमान् पर्वत
स्तेजस्वी नाद्विप्रतिज्ञावाक्यात्पक्षे साध्ये वा वच्छेदकानुसारणमिति संक्षेपः ॥ हेतुवचनत्वं लक्षयति पंचम्यंतमिति ॥ तृ
तीयांतं चेति ॥ वाकारो नास्त्यर्थो हेतुत्वशक्तिप्रतिपादकविभक्तिमत्त्वेनाभिमतं ॥ इदं चोपनये व्याप्तिप्रकारकत्वाय ॥ निग
मनवारणाय लिंगेति ॥ लिंगप्रतिपादके लिंगमात्रप्रतिपादकं साध्यप्रतिपादकमिति भावः ॥ तथा च हेतुत्वप्रतिपा
दकविभक्तिमत्त्वे सति साध्यप्रतिपादकन्यायावयवत्वं हेतुत्वं ॥ मायेतस्य प्रयोजनं तु पूर्ववन्नबोध्यं ॥ एवमग्रेऽपि ॥ नन्वे
वमपि इदंइंदाहरणं तदुदाहरणवाक्यात्मदृष्टान्तवचनात् ॥ यद्वोदाहरणं तदुपयोगात्मदृष्टं ॥ यथा घटइत्यादेः । अयं नधूमा
द्वह्निमान् ॥ व्याप्तिधीजनकत्वाभावान्महानसे धूमवान् न चाद्विधनशून्यस्यथाभवइत्यादेः । अयं च धूमाद्वह्निमान् ॥ चाद्वि
धं नत्यापत्वात् ॥ यत्रधूमस्तत्र महानसेनापि व्याप्तिरेकव्यासुदाहरणेति हेतुकदेशनतुलक्षणेति व्याप्तिरितिचेन्न ॥ हेतुलेने

गौ·त·
४०
73

स्यप्रकृतसाध्यविनेतिविशेषणोपात्ताउक्तस्थलेतुप्रकृतसाध्यंदहनसाध्यभिन्नत्वं। धूमस्यानन्यसाध्यवह्निमाधिक्यत्वंकत्व
त्रैवर्ण्यंचसमर्थहेतुत्वसमनान्वयइतिनातिव्याप्तिरिति। निर्बाललघुत्वेधनयासिध्यते॥ धूमवत्त्वादितिप्राचीनमताभिप्राये
णकथायांधूमादित्येवप्रयोक्तव्यंनतुधूमवत्त्वादिति॥ मतुपोवैयर्थ्यापत्तिरितिविनामतोपिकाराः॥ उदाहरणंलक्षयति॥
सव्याप्तिकमिति। उपनयादावतिव्याप्तिवारणायदृष्टान्तेति॥ यद्यपिदृष्टान्तप्रयोगस्यनसार्वत्रिकत्वं॥ समयबन्धाधीन
त्वात्॥ योयोधूमवान्सोऽग्निमानित्येतावतैवव्याप्तिग्रहादितिसिद्धान्तः॥ तथाप्युभयवादिसिद्धसाध्यसाधनसहचारकस्य
दृष्टान्तशब्दस्यव्याप्यव्यापकभावमात्रपरत्वेसव्याप्तिकपदेनचव्याप्यव्यापकवत्त्वस्यव्याप्तिनियतत्वंलभ्यते॥ तथाच
व्याप्यत्वाभिमानतुद्देश्यकव्यापकत्वाभिमतविधेयकत्वानजनकमापावयववत्त्वमुदाहरणत्वमितिफलितोर्थः॥ उद्देश्य
तावच्छेदकव्यापकत्वंविधेयस्यभासतइतिव्याप्तिनियतत्वंउद्देश्यविधेयभाववत्स्थलेतच्चैवमनुमतेः। योयोधू राम
मवानितिव्याप्यत्वाभिमतधूमवद्व्यक्तीनामुद्देश्यत्वंसोऽग्निमानितिवह्नेर्विधेयत्वंतत्रोद्देश्यतावच्छेदकधूमव्या ४०
पकतावद्वह्नेर्लभ्यते। एवंयत्रवह्न्यभावस्तत्रधूमाभावइतिव्यतिरेकव्याप्त्युदाहरणेव्याप्यत्वाभिमतोवह्न्यभावः

व्यापकत्वेनाभिमतो धूमाभावो वा कोप्यसः॥ यद्वा अन्वयव्याप्तिप्रदर्शनेन तात्पर्यमुदाहरणांशस्य तावेव व्याप्यव्यापकावभि
मतौ स्फुटीकृतावेव भवत इति नैव वादाहरणानता॥ यद्वा व्याप्यप्रदर्शनेन व्याप्यव्यापकभावाभावानवगतेरिति। व्यापक
प्रदर्शनेऽपि व्यापकव्याप्यभावावगमानोपत्तिलक्षणप्रत्यक्षरूपं यमिति नैकतरोदाहरणव्याप्तिः॥ अभिमत
देव व्याप्तिवादिहेतुघटितोदाहरणं व्याप्तिवारणायेति सामान्योदाहरणलक्षणं॥ विशेषलक्षणं तु साध्यसाध
नव्याप्तिप्रदर्शनकोदाहरणत्वमन्वयोदाहरणत्वं। साध्याभावसाधनाभावव्याप्तिप्रदर्शकोदाहरणत्वं व्यतिरेको
दाहरणत्वं बोध्यं॥ यच्छब्दसमभिव्याहृतपदार्थवृहद्देशपकतच्छब्दसमभिव्याहृतपदार्थविधेयकबोधजनकं भा
वाक्यत्वमुदाहरणत्वमिति वा सामान्यलक्षणं बोध्यं॥ उपनयलक्षणमाह॥ पक्षइति॥ लिंगस्य व्याप्तिविशिष्ट
स्योपसंहारो वैशिष्ट्यबोधोऽस्मादिति॥ तथा वैशिष्ट्येनास्याधिकरणस्याकोक्तत्वात्॥ पक्षेइत्यस्य समासस्ये
नाप्यन्वयः॥ तथा च पक्षविशेष्यकव्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानजनकन्यायावयवत्वमुपनयत्वं॥ निगम
नगारणायविशेष्यकांत॥ तत्र व्याप्तिविशिष्टस्य पक्षेण वैशिष्ट्यग्रहः॥ किंतु पंचम्यर्थ इति वक्ष्यते॥ नचव

गो·त· ४१ न्हिव्याप्यधूमवानयमितो वन्हिमानिति प्रतीतिस्तापामाति व्याप्तिविशिष्टत्वां पक्षतावच्छेदकविशिष्टपक्षे व्याप्यवै
शिष्ट्यावगाहित्वस्योक्तत्वात्॥ अत्र वन्हिव्याप्यधूमवत्पर्वतत्वस्यैव पक्षतावच्छेदकत्वात्तयोर्विशेषविशेषणता
भावादिति॥ साध्याविषयकत्वं वाविशेषणादुपमितिसंग्रहः॥ अत्र सामान्योपनयलक्षणे व्याप्तिपदं व्यभिचा
रधीविरोधिधीविषयत्वरूपेण व्याप्तिरूपपरं तु मयव्याप्तिज्ञाने विनव्याप्तिमिचारधीरितिप्राचीनस्वरसात्॥ वि
शेषलक्षणे त्वन्वयव्याप्त्युपनये व्याप्तिपदमन्वयव्याप्तिपरं॥ व्यतिरेकव्याप्त्युपनये व्यतिरेकव्याप्तिपरमि
तिबोध्यं॥ यथेति॥ वन्हिव्याप्यधूमवांश्चायमित्याकारक एवोपनयो न तु धूमवांश्चायमित्याकारकः॥ अ
नुमितिकरणत्वेति लैङ्गता लिङ्गपरामर्शस्य व्याप्तिपक्षधर्मतावगाहित्वे अवयवं तत्राभावादिति॥ कस्यचि
न्मतेमाह॥ तथा चेन्निगशङ्के अनास्थायां॥ तथैव तस्य तत्प्रकारकत्वेनोद्धारात्तत्प्रकारकत्वं पत्वेन तत्वधर्मा गम
नां अत्रप्रकारत्वासम्भवात्॥ पूर्वोक्तारोपनयः समीचीन इति भावः॥ निगमनं लक्षयति॥ पक्षेति॥ साध्याव ५१
संहार इति॥ समासोऽर्थश्च॥ पूर्वोक्तरीत्या॥ इदं च यद्यपि प्रतिज्ञायामतिव्याप्तं॥ तथाप्यवयवान्तरोपस्थापितपक्ष

साध्यवैशिष्ट्यावगाहिज्ञानजनकस्यावयवत्वं निगमनत्वं बोध्यं ॥ उपनयाव्यवहितोत्तरत्वेनोपस्थापितप्र
कृतनिगमनेन साध्यवैशिष्ट्यबोधनात् ॥ प्रतिज्ञायाः पक्षस्यावयवांतरोपस्थापितत्वाभावान्नातिव्याप्तिः
। एकदेशिमते तु निगमनवाक्यं दर्शयति । तस्मात्तथेति ॥ अत्रापि विशेषाकाङ्क्षायां । तथेत्यनेन पूर्वोक्तवह्नि
व्याप्यधूमवानयमित्युपस्थापने तेनान्वयाद्विव्याप्तिहेतुवाणां द्रष्टव्यं चिंतामणौ ॥ अत्र पंचानामवयववाक्यानां शा
ब्दबोधप्रकारः संक्षेपेण प्रदर्शयति ॥ तत्रादिप्रतिज्ञावचनेन तावत्पर्वते वह्निसाध्यकेति मध्यस्थेनोक्ते प्रतिज्ञादिवा
क्यं विनाहेत्वभिधानस्यानन्वयात् ॥ प्रथमं प्रतिज्ञारूपावयवप्रयोगः आवश्यकः । यथा पर्वतो वह्निमानिति
। अत्र पर्वतेन विशिष्टे वह्निमत्त्वे संदेहो भासते । ततः कुतोऽस्य वह्निमत्त्वमित्याकाङ्क्षायां धूमादिति हेत्ववयवप्र
योगः । अत्र धूमस्य वह्निं प्रति तदनुमितिं प्रति वा हेतुत्वस्याभावात् । लक्षणया धूमपदेन धूमज्ञानं । पंचम्या व
ज्ञाप्यत्वमुपस्थाप्यते । विभक्त्यर्थे प्रकृत्यर्थः प्रकारत्वेनान्वेतीति तेन धूमज्ञानज्ञाप्यत्वमर्थः ॥ तत्र वाक्यैकवाक्य
तया प्रतिज्ञास्थवह्निपदोपस्थाप्येऽन्वेति ॥ तथा च धूमज्ञानज्ञाप्यवह्निमदभिन्नः पर्वत इमानि प्रतिज्ञाहेत्वोरेक

गी. त. ४२

75

वाक्यतया बोधः। नवीनास्तु। धूमपदस्यानन्तरानेलक्षणा।। पंचम्या एकस्मान्नस्याप्यलेलक्षणेति ॥ इति तान्नस्या
त्वं च स्यान्नजन्यज्ञानमविषयत्वं। ततः कथमस्यानुमत्वं मित्याकांक्षायां वाक्योपलब्धमेतायां च दर्शनीयो म
ध्यमवाद्यानिवर्दर्शनार्थमुदाहरणान्तरमाहुः। यो यो धूमवान्सोग्निमानिति। अत्राग्नानुपादाउद्देश्यतावच्छेदक
धूमव्यापकत्वं च हेतुविधेयमलक्ष्यते।। तथाहि।। यो य इति वीप्सया महानसनदलो बाहिरूपेणाशेषतो
धूमाधिकरणव्यक्तिस्तिरूपस्थाप्यते।। तासां च संबंधित्वं पदज्ञानयुद्धिविषयाणां एकैकेनवतनहेनवुद्धिस्थ
तावच्छेदकेनोपस्थापनात्।। तत्राग्निमत्त्वस्यान्वये धूमव्यापकतापन्नहेतिसिध्यति।। अत्र वीप्सापदहानेन तु तस्य
हेतोः।। नानारूपेणायनभहोपस्थापितानां युगपदन्वयहोपस्थापनेनान्वयातं।। यथा पद्मानां प्रतिजहिज
गन्धार्थिनमसून्नः इति मालतीमाधवे।। अत्र तु पदहोपस्थापितानां क्रमेणान्वयहादुपस्थितौ ना राम
न्वयः। तत्र तन्महेविशेषता। यथा विवरणीभावं समभूमिपालइति रघुवंशे।। यथा वा। पांपांशिवः प्रेक्ष्यति का ४२
नरार्हांसासान्निधानमनुरकीवभूव।। निशंकमन्याः समभावतिनेय्यः स्त्रयोनोजघरमुकवासैरितिमा

घे॥ यथा महानसमिति दृष्टांतवचनं नमर्षच॥ यत्र दृष्टांते अन्वयशंकव्यइति समयबंधः तत्रैव तदावश्य
कत्वं॥ ततश्च वसमभवतु धूमो वन्हिव्याप्यस्तस्य पक्षधर्मत्वं विधत्तेणानवेति आकांक्षायां वन्हिव्याप्यधूमवांश्चा
यमिति उपनयप्रयोगः॥ निरूपकतासंबंधेन वन्हिसंबंधिव्याप्तिमद्भिन्नो यो धूमः तत्संयोगापि अन्यः पर्वतइ
तिशाब्दबोधः॥ व्याप्यस्य पक्षधर्मताज्ञानं विनानानुमितिः तज्ज्ञानं नाधयत्वं तदाहि न केवलस्य अन्वयरूपकः
हेतोः पक्षधर्मताज्ञानेपि बाधितत्वायवबोधेनानुमितिरिति पद्गतमेसति मंत्रभवति ततहृत्ताव ज्ञानसा
ध्यमिति व्याप्तित्वान्न बाधितत्वादिज्ञानस्याप्यनुमितिहेतुत्वं मतं तत्त्वदर्शी निगमनप्रयोगः॥ तस्माद्वन्हि
मानिति॥ अत्र महेनपूर्वोक्तं वन्हिव्याप्यधूमवाग्ग्रहः॥ पेवमर्थोपिपूर्वोक्तवत्॥ तथाच वन्हिव्याप्यधू
मवत्त्वेनज्ञाप्यत्वाद्वन्हिमदभिन्नोभिन्नकपचेनवाभिनाभिमनेनान्वयः॥ अत्र तस्मादित्यनेनसोनरव्याद्देनिपांते
बानातस्मादिस्येसेनेतिपंचिनवलाभः॥ वन्हिमानिति तस्य च बाधनत्वानन्तरभावेवानिति अबाधितत्वला
भः॥ अत्र पंचावयववहूताजीनामथार्थबोधानन्तरंपर्वतइति जहत्ज्ञानजनकीभूतज्ञानविषयोधूमो वन्हि

गो.न. ४३ 76

व्याप्यः पर्वतवह्निति। गन्धितो ऽयमत्यन्ति पक्षिनत्त्रेति महाकाशस्वर्ष्टिवेध्यो नापन इति प्राचीनावंदंति॥ महार्वार्यशि
रोमण्यतिमित्त्यांगा॥ क्लियते॥ उदाहरणाण्यतिराकांक्षनतयाकेनाप्यवयवेन सहानन्वयात॥ प्रतिज्ञाहेतूदाहरणोपन
यनिगमनयोरेकवाक्यतासंभवेनामेवानितिः॥ मीमांसकास्तु केवलप्रतिज्ञाहेतूदाहरणरूपावयवत्रयमात्रमिति
॥ सौगतास्तु उदाहरणोपनयरूपावयवद्वयमिति॥ तन्न॥ प्रतिज्ञाहेतूदाहरणोपनयनिगमनेन योग्यताकांक्षापाः प्रयोज
नस्य च संप्रेषेणादर्शितत्वात॥ अतएव महाभारते भागवतध्यासवाक्यं॥ एवं पञ्चावयवयुक्तस्य वाक्यस्य गुणदोषविवहिति॥
ऽयं थागौरवमियादिर्मते। तत्रानुमानवाक्यस्य शब्दरूपतया कथं न्यायावयवसंभवः॥ इच्छाहेर्वसावयवत्वात् आह॥ ए
नइत्यादि॥ तथा चाद्रिर्मनुमावकइति वचनं अत्रावयवशब्दो गौण इति भावः॥ तर्कोपयोगकलमयति॥ तर्कइति॥ अत्र
तिरूप्यप्रयोगः। प्रसंजनं आहार्यमानस्यारोपः॥ आहार्यं च बाधस्त्वेपि आवश्यानजायमानं ज्ञानं आनिष्टं वह्निवि
ति रूप्यप्रयोगः॥ ... एम
धं॥ प्रामाणिककल्पनागः अप्रामाणिककल्पीकरणं वा यथा॥ यानेजनत्यहिविपासाच्छमयेतानेदाविपासुनानया ४३
येना॥ घनाहिपना॥ अत्रमनप्रमाणप्रमाणसिद्धस्यापि पास्वेपत्वस्य परिहारो अनिष्टं॥ द्वितीयं तु मूलेदर्शितं॥ एवमत्रघटइस

नेनास्वत्राप्रामाण्यालौकिकस्य नष्टानीतनदर्शनविषयत्वस्य स्वीकारोऽनिष्टं स्वप्रामाण्यालौकिकतावच्छेदकधात्। नन्विदं शास्त्री
धं नस्य योक्तं इत्याशनिरुक्तमहं गो श्रुति व्याख्यानियमन साध्यहा।। सर्वेति।। साध्याभावाद्रूपो व्याप्तिरूपानेमापितत्केवलकार्यान्।
न तु वह्न्याद्यभावव्यापकत्वं ह्रदे उपमानाव्याप्तिप्रतियोगि वह्निहेतुसिद्धव्याप्तिकत्वात्।। लक्ष्मात्तु व्याप्यत्वाद्येव व्यापकस्याया
द्वकस्यांशाकारे साध्याभावे तेव्यापकस्यानाश्रयस्य प्रसंजनमाहार्येऽत्र यत्र लकैदं स्वर्थः।। तथा च व्याप्याहार्यं व्याप्यप्रसज्जनस्य व्या
पकत्वाहशाभ्रमयल्लकेः साध्याहार्यव्याप्यमात्रे इति व्याप्तिशास्त्रायज्ञतां।। यत्रेनार्थे युक्त्वह इति निष्क्रयसत्वेशाख्ये हे
कारीहिभ्रमाहद्यं युक्तेषद्र्याहार्यारोपत्वज्ञनहारोपेति व्याप्तिशास्त्रायप्रथमसमाहार्यव्याप्तिः।। सज्जनत्वव्याप्याभावव
त्वग्रहकाले साध्याहार्यनधाव्यक्त्वाहानजसमवृत्तं जनकमिमना हार्यज्ञाने इति व्याप्तिशास्त्रायद्वितीयसमाहार्यवद्।। सा
मवद्वेवस्वह्रदार्थको साध्याहार्यज्ञानस्य प्रमाहेत्वाभावात्पवादि वंहत्वव्याप्यत्वविशेषजनकत्वाहार्यज्ञानात्सुत्वं
वंहदुत्वाहार्यारोपे लक्षणाविद्यमतिव्याप्तं।। न चानिष्टस्य व्यापकस्य प्रसंजनं वा व्याप्तिरिति वाच्यं।। मुख्यमिदं वानरमुख
विशाहारवति व्याप्तं।। पूर्वे निरूढत्वानिष्टत्वस्य मुखं वेहदुत्वाहारवति संभवात्।। न च व्याप्यनिष्टप्रकलते व्याविरोधिनधाव्यकस्य

गो·त· प्रसज्जनं तर्क इति वाच्यं ॥ मठति च मधुविषाक्तमन्नं भक्षयति व्यक्तिरहामीत्यसमान्ता इत्तर्के समभोजनादिति पयके ख्यापि
५५ शरकत्वं ॥ न चेला घटवाहितर्के व्याप्तिरिति वाच्यं ॥ तेषामव्यालस्पत्वानवस्था प्रमाणात्मह कृतानिपातर्के पदेस्याप्रोमान्वात
॥ अनिष्टापत्त्यावेवतर्केपदं मुख्यं ॥ यदि च लाघवादिना धारणा मन्यते ति तेन तदा तादृशाव्याप्यकारोपत्रतिमानसत्त्वाप्य
जातिमत्वेन लक्षणं अव्याप्तं ॥ अन्ना नाद्दिवारणाय फलत्वं ॥ गुणत्वादिवारणाय मानसेनादि ॥ तादृशतर्कत्वं कृपजा
तिध्वतर्कत्वा ॥ तनुपदत्तापवपयन्नयावनर्के पदे दृशव्यन्तावलोकनं वा समिधा ॥ उदाहरणनिपश्चमेति ॥ अत्र यटः प
भूः ॥ अत्र भेदिव्यतिरेकावताकरकं परतसंयोगाभ्यादिरित्यर्थः ॥ वस्तुस्थिहरणवेयावन्तेस्मतानिविशेषणावृत्तं ॥ तैत्तैतदेशसंयुक्तप
रमाणवावेन व्यभिचारः ॥ तेषां द्वयादिवारणायेत्ं ॥ एतद्भूतलवृत्तितयेदानीनतनवासुखदिवयवः स्यादित्यर्थः ॥ तेनतदेशाभ
दान्कालभेदस्तेनत्रापत्ति ॥ भूतलमिवेतिदृष्टान्तः ॥ एतद्भूतलवृत्तिपटवदित्यर्थः ॥ तैत्तैतद्भूतलेपतद्भूतलवृत्तियो राम
गिकसंयोगाभावांश्च दृष्टान्तस्यापादकं वैकल्यं ॥ यद्वा एतद्देशावच्छिन्नसंयोगाश्चन्त्स्यादित्यापादकं न दावस्ववृत्तिसंयोगस्य ५५
त्मिन्नविमत्वाद्यथाप्रकृतएतद्भूतलमिवेतिदृष्टान्तः संगच्छते ॥ अत्र व्याप्यस्य योग्यत्वविशिष्टोनदेशवृत्तिलस्य घटे सत्त्वेप्या

हार्येण दोषः। व्यापकस्यनाहशवाह्नुषविषयत्वस्याहार्येणानहन्तर्कं प्रतिकारणमिति लक्षणसमन्वयः॥ तर्कस्य प्रयोजनं
दर्शयति॥ स चायमिति॥ प्रमाणानां प्रमाणस्याहार्यं अनुग्राहकः॥ प्रमाजनने सहकारी इत्यर्थः॥ अनियतजिज्ञासाविच्छेदेनाति
यतजिज्ञासाजननमनुग्राहकत्वमित्यर्थः॥ तत्र घटाभावादिप्रमायाः प्रमाजनने प्रत्यक्षप्रमाणस्य सहकारी तर्कः। अत्र वधानेन प्र
दर्शितः॥ अनुमानप्रमाणस्य सहकारित्वं दर्शयत्यनुमत्यां तथाहीत्यादि॥ अत्र संदिग्धस्याग्नेः तर्कः प्रवर्तत इति सूचयितुं तर्क
विषयीभूतस्य संशयं दर्शयति॥ अयमित्यादिना पक्षे व्याप्यस्य कारणत्वं दर्शयति॥ कश्चिदिति॥ एवमापाद्यापादकयो
र्व्याप्तिज्ञानमपि कारणं बोध्यं॥ तर्कमाहाप्ययमिति॥ अनग्निमेव भविष्यतन्न धूमो ऽपि भविष्यतीत्येवंपरः प्रामाणिकः। अनग्नि
कत्वाद्धूमोऽपि भविष्यतीति तत्रेदं यद्यनग्निकत्वादिति व्याहूपकथनमात्रं॥ यो योऽनग्निः सोऽधूमः। यथा जलह्रद इति व्याप्ति
स्फोरकं वा। यदि वह्निमान्न स्यात्तदा धूमाभाववान् स्यादित्यर्थः॥ प्रसञ्जनं क्रियाते। आहार्येणानञ्जनमत इत्यर्थः॥ इहानी
मस्य तर्कस्यानुमानानुग्राहकत्वं दर्शयति॥ स चायमिति प्रवर्तमानस्य अनुमितिजनयत इत्यर्थः॥ धूमलिंगस्य धूमलिंगप
रामर्शस्येत्यर्थः॥ विषयमिति॥ अनुमानस्याविधिप्रवर्तको ऽनुग्राहकः॥ विषयपरिशोधको व्याप्तिग्राहकश्च॥ तत्राद्यं प्रदर्शि

गौ॰ त॰ तः॥ दृष्टान्तापेक्षणात्॥ धूमोपलब्धिर्हि व्याप्तिग्रहणात्स्यात्साहि वह्निजन्मोपलब्धिरिति विविक्तानामनुसंधेयं॥ अनुमानमिति

८५ विपर्ययपर्यवसानेन विशेषणकारतामर्थः॥ तदेव दर्शयति॥ अनर्थानि॥ ननु धूमाभावका न तस्मात्तदनन्तरमभावक

78 निति विपर्ययपर्यवसानेन वह्न्यभावव्याप्त्यसंशयनिरासादिति भावः॥ तर्कस्यानुमानग्राहकतामुपसंहरति॥ अनन्त इति

॥ एवं शाब्दप्रमाणग्राह्यत्वं संदेग्धि तत्कालनिर्णयः॥ तद्युक्तं मनुना॥ आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना॥ यस्तर्केणानु

यत ५ संधत्ते स धर्मं वेद नेतर इति॥ अनिर्धारितविषयतर्कस्य संशयपूर्वकत्वात्तन्नाम तं दर्शयति॥ अन्वेतिपदकेनि॥ तथा च पू

र्वोक्तिसंशयलक्षणानामाकांक्षानन्वासमग्रतामिति भावः॥ न च लक्षणानां नामवक्तिपत्नामितिवाच्यं॥ सूत्रकारेणैव तथा

लक्षणाकरणात्॥ अयं च तर्कः पंचविध इति प्राचीनाः॥ तद्युक्तं॥ आत्माश्रयादिभेदेन तर्कः पंचविधः स्मृत इति॥

तथा हि॥ आत्माश्रयइतरेतराश्रयचक्रकं अनवस्थापायीतदप्रसंगौ॥ न हि केन च स्वस्य किंचित्सापेक्षत्वं आत्माश्र एम

यः॥ यथा घटस्य लक्षणं घट इत्यत्र॥ तथ स्वं केनापेक्षत्वं तस्यापि तदपेक्षत्वमितरेतराश्रयः॥ यथा घटस्य ८५

टत्वं लक्षणं॥ घटत्वं तु घटेतरावृत्तित्वे सति सकलघटवृत्तित्वमिति परस्पराश्रयेणेत्यादि॥ आत्माश्रयः॥ यत्र तद्धेके

द्वितीयव्यक्तिसापेक्षत्वाद्द्वितीयव्यक्तेस्तृतीयव्यक्तिसापेक्षत्वात्तृतीयव्यक्तेः प्रथमव्यक्तिसापेक्षत्वं तत्र चक्रकं ॥ यथा
घटस्य घटत्वं लक्षणं । घटत्वस्य घटवृत्तित्वमसाधारणो धर्मो लक्षणं । तत्कृत्स्नलक्षणं च घटेतरावृत्तित्वे सति सकलघटवृत्ति
त्वघटित्रिमात्रवृत्तित्वमिति । तत्रैतस्य घटत्वस्य घटरूपप्रथमव्यक्तिसापेक्षत्वान्न भवति चक्रकं । एवं वस्तुपंचादिस्था
लेपि चक्रकं बोध्यं ॥ प्रथमद्वितीयव्यक्तिभिन्नस्यैव प्रथमसापेक्षत्वेपि चक्रकं ॥ सापेक्षत्वं च तदविषयकज्ञानानि
रूपत्वं ॥ इदं चान्योन्याश्रयादीनामुपलक्षणं तन्मोहदर्शिनः ॥ एवमुत्पत्तिस्थलेपि बोध्यं ॥ यथा घटं प्रति घटस्य हेतुत्वे आ
न्योन्याश्रयः ॥ घटसंयोगस्य घटं प्रति हेतुतायां प्रतिघटस्य हेतुत्वेऽन्योन्याश्रयः । घटे तत्संयोगो हेतुः तं प्रति घटक्रिया
हेतुः क्रियां च प्रति घटो हेतुरिति चक्रकं ॥ एवं क्रमेण सर्वत्र बोध्यं ॥ पूर्वपूर्वस्योत्तरोत्तरसापेक्षत्वमनवस्था ॥ यथा
घटलक्षणं घटत्वं जातिलक्षणं घटत्वत्वं जातित्वं तत्कृतानेतरं तत्राप्यसाजातित्वमिति परंपराकल्पनेऽनवस्थापत्तिरि
ति नजातौ जातिरिति हृतित्वं ॥ इदं च ज्ञप्तावुत्पत्तावनवस्था । यथा घटोत्पत्तौ घटो न दोर्कारणं तत्राप्यन्य इत्यादिक्रमेण
पत्रकार्यकारणभावादिग्राहकप्रमाणाभावस्तत्रैवानवस्था दोषः ॥ अतएव बीजांकुरादीनामनव्यव्यतिरेकवर्लक्षा

गौ॰ त॰ ५६ ७१

रणत्वेऽप्यभिमते स्वांकुरं प्रति बीजकं कारणं न त्वांकुराणां तत्त्वापि बीजानामिति त्वनवस्था स्वीक्रियते ॥ कार्यकार्यकारणभाव
ग्राहकप्रमाणाभावानवस्था न दोषाय ॥ इयमेव प्रामाणिकी मुखी त्वनवस्थेत्युच्यते ॥ एवमनाद्यनवस्थाऽविरोधात् ॥ यथा घ
टं प्रति स्वदंडं कारणं न त्वन्यदंडानामिति चानवस्था ॥ घटं प्रति घटत्वस्य हेतुत्वकल्पनं नास्ति । किं तु कल्पनीयं ॥ तत्र
कल्पनायां इयमनवस्था विरोधिनीति मूलक्षयकरीत्युच्यते ॥ तदुक्तमाचार्यैः ॥ मूलक्षयकरीमाहुरनवस्थां हि
दूषणमिति ॥ इयमेवोर्ध्वमुखी चानवस्था ॥ कार्यकारणकल्पमोन्मुखकालमिति ॥ व्याघातो विरोधः ॥ यथा
। वन्ह्यभाववान्स्यात्तदा धूमाभाववान्स्यादित्यत्र तु धूमाभाववान् भवतु वह्न्यभाववान्माभूदिति शंकिते व्याघातः । वन्ह्य
भावधूमयोः परस्परविरोधयोरेकत्रासंभावात् ॥ यथा वा ॥ क्षित्यादिकं यदि सप्रयत्नजन्यं न स्यात्तदा कार्यं न स्यादित्यत्र
प्रयत्नजन्यत्वं मास्तु कार्यं भवत्विति शंकायां व्याघातः ॥ प्रयत्नजन्यत्वाभाववत्कार्यत्वयोः परस्परविरुद्धयोरेकोपलंभा
त् ॥ वन्हित्वेन धूमत्वेन कार्यत्वेन प्रकृतित्वेन हेतुत्वे हेतुमद्भावः ॥ यदि वस्तुगृहीतान्वयव्यतिरेकहेतुं विनापि कार्यो
त्पित्साऽशक्येत ॥ तदा न स्वप्रवर्धमोजनादावपि प्रवर्तेतेति स्वक्रियाव्याघातोऽपि ॥ न चानालकः ॥ एकादशविधस्तर्क इति

एत ५६

वहंति॥ तत्र पंच पूर्वोक्ताः प्रतिबंदिलाघवयोर्विनिगमका इव यथायोग्यमिव पुनर्मिलिता एकादश। तत्र पूर्वपक्ष

सिद्धांतयोः साम्यं प्रतिबंदिः॥ यथा ईश्वरः स्वाश्रित्वादि किं करोतीति तदेदानीमपि किं करोतीति मीमांसकाद्युक्ते तु

ल्यमिदं कर्मप्रयोजनकत्वपक्षेऽपीति नैयायिकानां प्रतिबंदिः॥ तथा च तत्र कालादेः सहकारित्वात् समाधानमपि तु

ल्यं॥ समानप्रयोजनकत्वे सति कल्पनीयानां तदपेक्षया कल्प्यमानस्याल्पत्वं लाघवं। यत्तद्दुदं प्रति हेतुत्वेन तत्के

वलत्वापेक्षया कल्पनान्वच्छाघवकारत्वात्पमसत्तं॥ यथा अनेकेश्वरकल्पनापेक्षया एकेश्वरकल्पने लाघवं॥

लाघवलक्षणमेव स्वल्पपरस्थाने अनल्पपरप्रयोगो वलक्षणं भवति॥ यथा एकेश्वरकल्पनापेक्षया अनेकेश्वर

कल्पने। अत्र यथा। अन्वयव्याप्त्युदाहरणव्यतिरेकव्याप्त्युदाहरणयोरेकसाध्यसिद्धिः फलं न च तयोरुत्कर्षयोरेका

र्थसिद्धिः फलं चयोर्द्वयोर्मध्ये यत्र लाघवं तन्न कल्प्यते न तु लघुद्वयं यत्र द्वयोर्मध्ये यत्र गौरवं तत्र कल्प्यते। किंतु तद्द्वयमपि ति

विनिगमनाविरहेण द्वयोरपि तुल्यकक्ष्यतया उपयोगः॥ ननु यत्र गौरवं न तदेव कल्प्यते॥ यत्र लाघवं तत्र कल्प्यते

इत्येवं किं नेष्यते॥ अत्र किं विनिगमकमिति चेदुच्यते॥ ईश्वरस्यैकत्वकल्पनमिष्टानुबंधि। समानप्रयोजनकल्प

गौ·त· नाकल्पनयोर्मिथोऽस्वल्पविषयककल्पनत्वात्॥ कल्प्यः नानावाक्यैकवाक्यताकत्वकल्पनवत्॥ अत्र च धर्मशास्त्रप्र
४१ माणं॥ स्कृत्यप्रहावतेऽकं सेवाहि॥ स्मृत्याद्यनुमानेनेष्टसाधनताग्रहस्याल्पविषयकल्पनायामेकप्रकृत्यस्येच्छाजनमे॥
40 तथाश्रितिकर्तुरनेकत्वकल्पनं श्रुतिनिष्ठानुबंधि॥ समयप्रवीजनकल्पनयोर्मध्येऽनल्पविषयकल्पनत्वात्॥ कं
ल्प्यः नानावाक्यैकवाक्यकल्पनवत्समनुमानादिष्टसाधनताग्रहे गुरुकल्पनायां प्रेक्षावतोर्द्वयोरिष्टानिष्टविनिरितिसु
धीभिः विभावनीयं॥ ॥मूकेऽदर्शनमुत्सर्गः यथा॥ श्रुतेऽकमकन्मनेऽङ्कतिस्तिद्धः परमात्मा॥ तथाविनस्य शरीराभा
वेन यत्किंचित्कार्यकारित्वमेवासंभवितं॥ किंतु नर्जोगात्कर्तृत्वमिति मीमांसकाक्षेपेनेव्याथिका श्रात्मत्वेने च
तावदुत्सर्गतः कर्तृत्वसंभावना॥ यत्र यत्रात्मत्वं तत्र तत्र संभावितकर्तृताकत्वं॥ यथा श्रुत्यस्य रामः॥ यत्र यत्रासंभा
वितकर्तृताकत्वं तत्रात्मत्वाभावः॥ यथा घटः॥ एतच्च व्याप्तिकल्पनमिति सम्यक्तात्॥ उत्सर्गस्यैकदेशो बाधो श्रुपवा
दः॥ यथा स्वर्गकामोऽग्निष्टोमेन यजेतेत्यादिविधिना उत्सर्गतोऽग्निष्टोमस्य स्वर्गसाधनत्वं बोध्यते॥ तत्र जनका ाम
दृष्टमुमुक्षहिनाश्रयवाहान्स्यजनकत्वाभावः कल्प्यते॥ अथवा श्रुत्यत्वनउत्सर्गतो ज्ञानत्वे संभावितेमुक् ४१

न्यायप्रकाशेनमुक्तात्मनिराश्रनाभावःकल्प्यते॥ प्रश्नोत्तरयोर्निष्पत्तौ जननतयातु अविशिष्टांनन तथा च मोर्नवैयर्थ्यं। अ
त्रासिन्नाहुः सकर्तृकत्वे किं मानमित्याकांक्षायां उत्तरमनुमानमिति। तत्र किं प्रमाणमिति प्रश्ने ऽनुपलब्धसाधनः तत्रापि किं मि
त्याकांक्षायामनुत्तरमेवोत्तरं॥ काकदंतान्वेषणवन्मध्ये जननमिधेयात्॥ अधारणाः अनिर्दिष्टतेश्च॥ इयमेवशाकाविशा
खिकेन्याख्याते॥ अतिप्रसंगात्प्रश्नोत्तरहेतुर्वत्कर्कशतर्क इति कश्चित्तन्न। अप्रतिबंधे हि मध्ये उक्तत्वात्॥ तथाहि॥ अयं तर्का
ल्कतो हेतु शक्तित्वात्॥ यो नैवं स नैव व्याप्तिग्राह्यः कल्प्ये प्रतिप्रसंगाः॥ अथ हेतोः एतत् शराजाते हेतोर्हेतुत्वात्। यो
नैवं स नैवं यथा घटइत्यादेरपि अनवस्थानत्वात्। अत्र वेदाध्यादिनासमाधानं न हि तत्रापि तिर्यग्विशेषणका प्रमिति
प्रसंगा इति॥ अथ सोपाधिकत्वे तनिकल्पशाश्रोणल्ठिति कल्पतरहरूद्बुद्धिकल्पनतराभ्याधीनलाहयोलाघवमध्ये उक्तं तर्भू
नात्वेदितथाः॥ प्रतिबंधे हि प्रमानानां व्याघातमध्ये उक्तभावेदितिमाचां दूषणं॥ एवमात्माश्रयादीनामपि व्याघातनि
यतत्वेपि अवांतरवैलक्षण्यादेव यथा उपाधानेन तथा समाधानादि युक्तमानमिति नवीनानामाशयः॥ ज्योति
शास्त्रे षट्संख्यासंकेतनत्कतर्कप्रतिपादकहर्शीनानां षट्संख्यामूलकः॥ तर्कस्पंगातिपंच॥ यथा आत्माश्रयाणाद

कयोर्व्याप्तिः। विपरीततर्कप्रतिघातः। आपादकविपर्यये पर्यवसाने॥ आपाद्यस्यानिष्टत्वं। प्रतिवाद्यइष्टसाधकत्वरूपम
ननुकूलत्वं चेति॥ एषामंगानामेकतमस्याभावे तर्काभासत्वं। तच्च तर्काभासोऽष्टादशविध्यते। तर्काभासाः सप्त॥
यथा। आपाद्याप्रसिद्धिः। आपादकाप्रसिद्धिः। उभयाप्रसिद्धिः। मूलशैथिल्यं। प्रतितर्कविरोधः। इष्टापत्तिः। विपर्ययापर्यवसानमि
ति॥७॥ तत्रापाद्याप्रसिद्धिर्यथा ईश्वरो यदि जगत्कर्ता स्यात्तदा गगनकमलाहरणकर्ता स्यादिति। आपादकाप्रसिद्धिर्यथा ई-
श्वरो यदि शशशृंगी स्यात्तदा ज्ञानवान् स्यादिति। अत्रैवेश्वरस्य शशशृंगित्वं नैयायिकैर्नोरीकृतमित्यापादकमप्रसिद्धं॥ उभयाप्रसिद्धि
र्यथा॥ ईश्वरो यदि नित्यशशशृंगवान् स्यात्तदा नित्यमधर्मवान् स्यादिति। आपाद्यापादकयोर्व्याप्तिविरहो मूलशैथिल्यं। यथा
ईश्वरो यदि कर्ता स्यात्तदास्मदादिः स्यादिति। एतेषु तर्काभासेषु व्याप्तिरूपतर्कांगविरहः॥ एवमापादकस्येश्वरविशेषणतासि
द्धत्वोपि द्रष्टव्या॥ यथा कांचनमयः पर्वतो यदि कांचनमयपर्वतस्वभाववत्वं स्यात्तदा कांचनमयधूमाभाववत्वं स्यादिति॥ अ-
त्र विशेषणस्यासमर्थत्वादसिद्धिः। प्रतितर्कविरोधो यथा। ईश्वरो यदि कर्ता तदा रागी स्यादिति मीमांसकतर्कोपि नैया-
यिकानां प्रतितर्कः॥ ईश्वरो यदि कर्ता न स्यात्सर्वज्ञो न स्यात् घटवदिति। अत्र विपरीततर्कप्रतिघातरूपतर्कांगाभा-

धी

गत्वमनयोरपि न तर्काभासत्वं। पक्षे आपाद्यस्य प्रतिवादिसंमतत्वमिच्छापयति॥ यथा ईश्वरो यदि कर्ता स्यात्तदा शरीरवान्स्या
त्॥ अत्रापाद्यस्याऽनिष्टत्वरूपतर्काङ्गाभावः॥ विपर्ययपर्यवसानं यथा॥ ईश्वरो यदि जन्यज्ञानकर्तृत्वोभयाभाववान्स्यात्
तदा जीवः स्यात्कुलालवत्॥ न चायं जीवः॥ तस्माज्जन्यज्ञानकर्तृत्वोभयाभाववान्नेति न च जन्यज्ञानाभाववत्त्वोभयाभाव
सिद्धमेव चीतार्थत्वाच्च कर्तृत्वाभावरूपविपर्ययपर्यवसानमिति॥ अत्र विपर्ययपर्यवसानरूपतर्काङ्गाभावः॥ अननुकू
लत्वरूपतर्काङ्गाभावेन तर्काभासत्वं यथा॥ ईश्वरो यदि कर्ता स्यात्तदा शरीरी स्यादिति॥ अत्र पक्षे सति हेतुत्वे सति वादिनो नु
कूलत्वात्। धर्मिग्राहकमानेन तस्य कर्तृत्वस्यापि सिद्धेः॥ आपाद्यासिद्धत्वे तु आपाद्यस्याप्रसिद्धमध्ये विशेषः॥ पक्षे आपादकस्या
नाभावसंभवेन तत्त्वाहितसंक्षेपः॥ ॥ निर्णयपदार्थं लक्षयति॥ ॥ अवधारणात्मकं ज्ञानं निर्णय इत्यर्थः॥ तत्त्वप्रमाणेन को
ऽयं पक्षस्य निराकरणं स्वपक्षसाधनपूर्वकमर्थनिश्चयरूपं यथा पर्वतो वह्निमानेवेति। तदुक्तमाचार्यैः। विमृश्य पक्ष
प्रतिपक्षाभ्यामर्थावधारणं निर्णय इति॥ तत्रेति॥ प्रमाणरूपणावधारणमित्यर्थः तेन शुक्तौ विपर्ययजनमतेन धारणानिर्णय
निरासः॥ ॥ वादं लक्षयति॥ तत्त्वेति॥ विचार्यावधारणेच्छावतोरित्यर्थः॥ तेन जल्पवितण्डयोरतिव्याप्तिपरिहारः॥ तत्र विजिगी

वोरेकस्य कथकत्वात्। कथालक्षणं दर्शयति॥ तस्याः काहेत्यत्र यो विहाराः। वादे च न तत्त्वनिर्णयार्थिनो गुरुशिष्यसतीर्थ्यादयो
वीतरागाख्या अधिकारिणः। न तु विजिगीषवः। अत एव विजयफलकानां निग्रहस्थानानां अप्रतिभादीनां नोद्भावनमि
ति दर्शयति॥ स चेति। अनिष्टाहं तन्त्रज्ञानविरोधिनो ये निग्रहास्तेषामधिकारिणे तु उद्भावनयोग्यत्वमर्थः। अनिष्टे मन्त्रा
द्दे नियिक्षविनयार्थः॥ तथा च न्यूनाधिकत्वादिरूपनिग्रहस्थानोद्भावनं शैद्दनि दर्शयति तेनेति। न्यूनाधिकापसिद्धा
न्ताद्भयः॥ ये च हेत्वाभासाः इत्यत्र शेषो निग्रहस्थानानामर्थः। एषां लक्षणानामग्रे दर्शनीयानि॥ ॥जल्पं लक्षयति॥ उभयेति।
परपक्षनिराकरणस्वपक्षसाधनवत्त्वमर्थः। इह च विशेषणं वितण्डातिव्याप्तिवारणाय। वादेऽतिव्याप्तिवारणाय विजि
गीषुपदं॥ स तिसंभवे सर्वनिग्रहस्थानमस्योद्भाव्यमिति दर्शयति॥ स चेति। परपक्षदूषणोन्मादे वा स्वपक्षस्थापनामित्याह।
परपक्ष इति॥ अस्याश्च फलं विजयः। अत्र केवलं स्वपक्षस्थापनेन परपक्षदूषणेन वा न विजयः। किं तूभयसत्त्व इति बोध्यं॥ वितण्डां ल
क्षयति॥ स्वपक्ष इति॥ अत्रापि विजिगीषुकर्तृकत्वमनुवर्तते। तत्र तन्येति व्याप्तिवारणाय हीनांतं॥ पक्षस्थापनेति वैय
र्थ्यपक्षदूषणमात्रावसाना हीनातत्त्वनिर्णयफलिका या कथा सा इतिव्याप्तिवारणाय विजिगीषुपदं॥ अत्र परपक्षदूष

वरोन्नेवविजयोनतु जल्पवत् स्वपक्षस्थापना। प्रतिहर्षयति। चापेक्षहेत्वोरिति। इत्युपलक्षणं पुनरुक्तन्यादिकमपि बोद्ध्य-
म्भावनायमिति निग्रहस्थानमारम्भेनेव वक्ष्यते। स्वपक्षस्थापनाभावे हेतुमाह नास्तीति। वैतण्डिकेनापि हि कश्चित्सिद्धान्तमङ्गीकर्त्तव्ये
वक्तव्या कार्या॥ अस्य वा शाब्दस्यानित्यत्वे साध्ये कृतकत्वे हेतौ मीमांसकं प्रत्यनुमाह। एवं वैतण्डिकेनापि भावने नैव्यापि केवलं सा
धनेषु नः सोगतमते नास्ति दूषणं धनमुपस्थापयन् वैतण्डिकाभिमानी न पराजीयेत। अत्र नास्तिकादिमत निराकरणं बा
रान्त्वे निर्णयार्थं सरणार्थं जल्पवितण्डे कार्ये समपास्तराणां यं कंटकाक्षावरणाय तत्। तथा च नागार्जुनस्यापि कथा कुर्यादिति। न
त्वादिर्पि जित्वा वादेन इति निषेधविधिलोऽपि प्राप्ति छायावस्थेः न अभिमानश्च विषयो वा ॥ कथासामान्यलक्ष
तै० ७ णमाह। कथेति। एकवक्तृक पूर्वोत्तरपक्षे प्रतिवादिवारणाय वेत्ता नानेति॥ बहुभिः स्ववित्तानार्थिभिः कृतो विचारोऽति
व्याप्तिवारणाय पूर्वेति। तथा चैकेन पूर्वपक्षः क्रियते अन्येन समाधानं क्रियते एवं क्रमेण नानावक्तृकत्वमिति भावः। ना
नाशुकादिकृतानुवादे अतिव्याप्तिवारणाय प्रतियादिकेति॥ यद्यपि शुकोऽप्यादितं वाक्यं प्रतियादकं भवत्येव॥ ता
थापि वादिप्रतिवादिनो हेयत्वं प्रतिपत्तिजनकत्वमर्थः॥ शुकादिहारिनेहप्यन्वेवु द्वारमानना। पूर्वपक्षाद्येकथा

गो॰त
५०
४३

स्यस्योभयवत्त्वकत्वाभावादसंभवद्वृत्तिसंदेहसमूहरूपतादृशवाक्यानां संदेहसमूहग्रंथनं मूहइति यावत्। तथा च समूहस्यो
भयवत्त्वकत्वं विवक्षितमेवेति भावः। समुच्चयाभावेन्वयावताकथाविश्रान्तिसावच्छिन्नस्य समुदायः। तेनानैकदेशातिव्याप्तिः
॥ हेत्वाभासपदार्थलक्षणानि॥ उक्तानामिति॥ अनुमानप्रकरणोक्तिविशेषः। आदिपदाद्विपक्षासत्वप्रभृतीनां सं
ग्रहः॥ ॥ एकैकेनेति॥ पक्षसत्त्वं केनापि रूपेण हीनाः केवलान्वयिप्रभृतयः। सद्धेतव एव तूक्तास्तथापि विपक्षहे
तोर्यद्वंतिरूपाणि गमकतोपयुक्तानि तस्य तावन्मात्रेणापि किंचिन्न्यूनत्वमभिप्रेतं। केवलान्वयिसाध्यकस्यापि पक्षे
वृत्तित्वं। केवलव्यतिरेकिसाध्यकस्यान्वयपक्षासत्वं नामकतयोक्तं प्राक्। तथा च प्रकृतपक्षकप्रकृतसाध्यक
प्रकृतहेतुकानुमित्युपयोगिपक्षधर्मत्वादिरूपपंचकसमूहान्यत्वं हेत्वाभासत्वं॥ केवलान्वयिसाध्यके इति व्याप्तिवार
णायानुमित्युपयोगित्वविपक्षासत्त्वस्याप्यनुमित्यंतरोपयोगित्वात्तद्दोषवारणाय प्रकृतपदानीति। प्रकृतानु
मितिपदाणि॥ उपयोगित्वं च रूपाणामनुमितिजनकहेतुताज्ञानप्रकारतया प्राचीनमते अबाधितत्वादिरूपेण एम ५०
हेतोर्ज्ञानस्यानुमितिकारणत्वात्॥ असत्यानि नाम नावच्छदप्रयोगो वैय्यर्थ्यात्॥ अबाधितत्वादिज्ञानार्थमेव तत्र

योगः। तादृशरूपैकदेशपक्षत्वादि गगनाभावरूपेति। पक्षसत्त्वाद्येकैकोपाधिनैव पक्षसपक्षवृत्तिव्यभिचारिप्रम-
तावद्व्याप्तिरिति समनमवद्। तथा चासिद्धेः व्याप्ताक्षसत्त्वाभावः व्यभिचारिणि विपक्षासत्त्वाभावः। एवं विरुद्धेऽपि। एवं
वा धर्मसमतिपक्षस्थलयोरपि रूपद्वयाभावः तुल्यः।। अत एव तमन्वं चेतावताग्निम्मेहेत्वर्थं इति तेन वैयर्थ्यशंका।।
अत्रानुमितिजनकीभूतहेतुतानेकप्रमाणसाधारणी। तेन धूमवान् वह्नेरित्यादौ प्रकृतानुमितिहेतुता-
नतिव्यापसाध्याभाववति हेतोर्वृत्तित्वरूपासत्त्वेऽपि न क्षतिरिति कालकटुबाधितया विरम्यते।। अहेतव
इति।। अप्रमापका इत्यर्थः।। इत्थं चात्र घटादेरपि लक्षणमेवाद्धेत्वाभासत्वमनानिं दर्शयति।। नेपाति।। केति
पदेति। यद्यपि पर्वतो वह्निमान् द्रव्यत्वादित्यत्र द्रव्यत्वस्य जलत्वादिनो सत्प्रतिपक्षितस्य बाधितस्य पक्षसपक्षा-
सत्त्वे विपक्षसत्त्वे हेत्वाभासत्वेनैकमपि रूपं विद्यते।। तथापि हेत्ववयवप्रतिपक्षित्वादिकं सादृश्यमस्तीति ना-
संगतिः। तथा च हेतुरूपेनाऽनुरूपपदं साधर्म्यपरं नतु पक्षसत्त्वादिरूपं च रूपपरमिति बोध्यं।। अनेन योगार्थकथ-
नेनदुष्टा च हेतवो हेत्वाभासा इति दर्शितं हेतोराभासा हेत्वाभासा इति व्युत्पत्तौ हेतुदोषाः व्यभिचारादयः

गौ॰त॰
५२

यद्धेत्वाभासाः नयुक्तो हेतुर्दुष्ट इति गौध्वं।। तद्दर्शनमेव हेत्वन्तर्दर्शयति।। तेषामसिद्धेति।। असिद्धं लक्षयितुमाह अन्यत्रेति।।
।। उदयनेनेति उक्तमित्यत्र तत्तेनानेति।। असिद्धलक्षणमिति।। ननु त्वे नावच्छिन्नविषयतयापरामर्शाभाववत्त्वमसि
द्धत्वमित्यागतं। इदं च असिद्धत्वविपरामर्शाभावदशायामतिव्याप्तमिति चेत्।। तद्भाववत्त्वस्य तस्याः सिद्धेरभा
वोपस्थापकत्वादिति क्रमेण व्याप्तिविशिष्टपक्षधर्मताज्ञानप्रतिबंधकज्ञानविषयत्वे सति व्याप्तिवारणाय व्यभिचारल
क्षणसिद्धत्वं असिद्धिमान्‌ हेतुरसिद्धः। व्याप्त्यभाववत्ताज्ञानेन पक्षधर्मताभाववत्ताज्ञानेन च परामर्शप्रतिबन्धनात्।। बाधादिवा
रणाय सत्यन्तं। व्यभिचारादिवारणाय विशेष्यं। केचित्तु तदभाववत्ताविषयताभूतव्याप्तिपक्षधर्मत्वाभाव इति वदन्ति।
असिद्धस्यानन्तर्भावो नास्ति। असिद्धिसत्त्वे अवश्यं विरोधादिसंभवादिति। तथा च तत्तद्दोषेषु हेतोर्दुष्टतासंभ
वात्‌ किमसिद्धेर्दोषत्वेनेति न तानि पक्षरूपशंकते।। यद्यपीति सांकर्येऽपि दोषाणां तत्सामान्याधिकरण्येन असिद्धिविरुद्धा
दीनां व्याप्त्यर्थः अत्रोपधेयसाङ्कर्येऽपि विरुद्धादेः संकरत्वेऽपि असिद्धत्वविरुद्धत्वादिपुरस्कारेण अनुमिति
विरोधितया इत्थं त्वाहुः यथा तत्कि नो पकत्वेन तत्तज्ज्ञानं स्वविषयीभूतानां मित्यादिकमेव विरोधिज्ञानविषयाणामाह।।

एम
५२

यानसांकर्यमिति॥ उच्यते उद्भाव्यते इत्यर्थः॥ हेतोर्नानादुष्टरूपत्वेन यथा सांकर्यं न भवति। नानादोषवत्वे न्यूनत्वेन भ
वतीति तथा उद्भाव्यते। एकदोषोद्भावनमेवाक्षिप्यते तेनैव कथायाः समाप्तिरिति भावः॥ तत्रापि नानादोषसत्वे एक
स्य कस्योद्भावनं कार्यमित्यत्र विनिगमकमाह॥ योहीति॥ पुरतः॥ प्रथमतः॥ परिस्फुरति॥ उपस्थितो भवति॥ दुष्टत्वमेव
दुष्टतया ज्ञायते॥ असाधकतानुमानेव्याप्तिपक्षधर्मताशालिलिङ्गोद्भावनाय इति शेषः॥ दुष्टविज्ञप्तौ समर्थ इत्यस्य व्या
ख्यानं दुष्टविज्ञप्तिकारकमिति॥ दूषयतीति दूषणं॥ असाधकतासाधकमित्यर्थः॥ सहवेनैव कास्यावच्छेदं इयमा
हानावइति॥ कुतइत्यपेक्षायामाह॥ तेनैवेति॥ तदुपजीविनः तदुत्तरपक्षेत्यर्थः॥ तदुपयोगिन इति वा द्वयवधानो वार्थः॥
अनुपमोदादिति॥ आधिक्येन निग्रहो विबोध्यः॥ विरोधः कस्य उद्भाव्य इति दर्शयति पक्षेति विरोध इत्यस्य विवरणं प्रति
वर्धयेति॥ विपर्ययस्य साध्याभाववल्लक्षणं विपरीत धर्म इत्यर्थः॥ विरुद्धो विपर्ययव्याप्य इति पाठे नाहान्यसंबन्धेन हेतुनपाऽसा
धकतानुमापकत्वरूपदुष्टत्वविकारकत्वं बोध्यं॥ अनैकान्तिकादीनामुद्भावनक्रमं दर्शयति॥ एवमिति॥ तथा
भूतादिति॥ पुरःस्फूर्तिकादित्यर्थः॥ अनैकान्तिकादयइति तत्रोद्भावनीया इति शेषः॥ व्याख्याति॥ व्याप्तिपक्षधर्मताविशि

१६
२१

गौ.त.
५२
९५

हेत्वंशे तु स्वरूपं तथात्वाश्रयभावेन तद्विषयकत्वान विषयताभावेन। व्याप्तिपक्षधर्मतात्वन्तराभावेनेत्यर्थः। पूर्वोक्ता इति
।पुरःस्फूर्तिका इत्यर्थः। यत्रैव तथात्वार्थः। तथाच असिद्धापत्तेः व्याप्तिपक्षधर्मताभाववत्तया पुरःस्फूर्तिकास्तत्रोपहारवती
वा इत्यर्थः। असिद्धादय इति पाठे असिद्ध्युपहितेनासिद्धिविधासिद्धमध्ये एकस्य ग्रहणं। आदिपदेन व्यतिरेकोपीति बोध्यं। दु
ष्टत्वात्सर्पाशे तदपेक्षया तथात्वेन तदेव दुष्टत्वान्तिकाः। काः हेतोः साधकतानुमापका इत्यर्थः। यो। तदितरस्य इति पर्ये
वसितत्वमित्यर्थः। पराऽपूर्वोक्ता इत्यस्य विवरणं दुष्टत्वमिति। अनित्या इत्यस्य विवरणं दुष्टेति कश्चित्। असिद्धस्यान्तर्भे
दानाह। तथाभूत इति। दुष्टिज्ञप्तिका इत्यर्थः। आश्रयासिद्धं लक्षयति। यस्येति। आश्रयः पक्षतावच्छेदकविशि
ष्टः। तादृगाश्रयस्य पक्षतावच्छेदकवैशिष्ट्याभावात् असत्त्वादित्यर्थः। तथाच यस्य पक्षे पक्षतावच्छेदकाभावः स आश्रयासिद्ध इत्य
र्थः। दुष्टहेतोरिति गगनेति। अत्र पक्षे अरविन्दे पक्षतावच्छेदकस्य गगनीयत्वस्याभावः। स्वरूपेति। स्वरूपं ज्ञानेत्यर्थः। तेन नपो
नरुक्त्यदोषः। अत्रेति गगनारविन्दे गगनीयत्वप्रकारकभ्रमविषयारविन्दमाश्रयः पक्षः। अत्र पक्षो नास्त्येवेति। पक्षतत्त्वा एम
च्छेदकविशिष्टो न भवत्येवेत्यर्थः। अन्यथा प्रतियोगिकाभावस्याप्रसिद्धिकतया निषेधानुपपत्तेः। सिद्धसाधनस्थले त्वपर्यंहेत्वा ५२

भावइति॥ हेत्वाभासांतरासांकर्यमस्य दर्शयितुमुदाहरणांतरमाह॥ अपक्षपातिघटइति॥ अनित्यत्वंध्वंसप्रतियो
गित्वं॥ पक्षेघटेपक्षतावच्छेदकस्यघटत्वस्यसत्त्वात् आश्रयासिद्धिरितिमन्दाशंकते॥ नन्विति॥ आश्रयस्यप
क्षतावच्छेदकविशिष्टस्यसत्त्वादित्यर्थः॥ ननुतथापितत्रहेत्वाभासांतराभावात् कथंहेतोरेवापक्षत्वेनेत्याह॥ सिद्ध
त्वे॥ सिद्धस्येति॥ अत्रतस्यसाध्यसाधनंयस्माद्धेतोःससिद्धसाधनइत्यर्थः॥ तथाचतत्रसिद्धिरूपप्रतिबंधकसत्त्वा
न्नानुमितिरितिभावः॥ नदेवदर्शयति॥ सिद्धस्येति॥ अत्रसाध्यनिश्चयपक्षत्वेघटस्यपक्षत्वाभावात्पक्षतावच्छेदक
स्यपक्षत्वविशिष्टहानित्वाभावोविघटनंच॥ घटहानित्वेपितस्यपक्षहानित्वाभावात्तस्मिन्प्रत्यक्षात्तसमाधत्ते॥
मेवमिति॥ स्वरूपेणाघटत्वादिमत्त्वयाश्रयःपक्षइत्यर्थः॥ अनुमानस्येति॥ कारणकसत्त्वाद्धेतोरित्यर्थः॥ सं
दिग्धत्वेनेति॥ साध्यवत्त्वतदभावकोटिकसंशयविषयत्वेनेत्यर्थः॥ संदिग्धधर्मवत्त्वेनेतिपाठेधर्मःसाध्यं॥ इदमु
पलक्षणं॥ सिषाधयिषाविरहविशिष्टसिद्ध्यभाववत्त्वेनापिबोध्यं॥ नानुपलब्धेर्थेइतिव्याख्यानंप्राक्॥ घटेपक्ष
त्वाभावमुपपादयति॥ नचेत्यादिना॥ अहेतुरिति॥ असाधकइत्यर्थः॥ अनित्यत्वानुमितिजनकतामित्यादिइति

बाधविषयत्वेनुपलसत्तासत्प्रतिपक्षस्यापि दृष्टाविशेषस्य हेतुत्वमिति निष्ठेयं॥ ॥ स्वरूपासिद्धिं लक्षयति॥ स्वरूपेति॥
स्याश्रय इति पक्ष इत्यर्थः॥ सत्वप्रत्यर्थी एतितत्वं॥ पक्षे हेतोर्निर्णीयमाने॥ पक्षे हेतोर्निष्ठाभावकालि इत्यर्थः॥ लक्षेल
क्षणं योजयति॥ कृतकत्वमिति॥ शब्दमात्रसंबंधप्रमाभावप्रतियोगितयाकृतकत्वस्य कार्यत्वं रूपस्य हेतो
स्तत्र हेतोर्निष्ठासंबंधाहि इति भावः॥ भागासिद्धस्य स्वरूपासिद्धमध्ये अंतर्भावं दर्शयति॥ भागासिद्धेत्यादिना॥ हेतो किं
चित् संबंधे हेतोर्नैकसति केचित् पक्षावच्छिन्नत्वं भागासिद्धत्वं॥ एतदेव दर्शयति॥ पक्षीकृते विति॥ भागासिद्धपद स्वा
र्थमाह॥ अतएवेति॥ भागो पक्षैकदेशे स्वरूपासिद्धत्वं॥ हेतोर्निष्ठाभाव इत्यर्थः॥ एवं हेतुविशेषणासिद्धमप्यन्ता
नामप्यत्रैवांतर्भावं दर्शयति॥ तद्वत्तेति॥ क्रमेणोदाहरति॥ तत्रेत्यादिना विशेषणाविशिष्टस्य हेतोः पक्षे
त्तिनिष्ठाभावो विशेषणासिद्धिः तदा नसरा॥ द्रव्यत्वे सतीति गुणादौ व्यभिचारवारणार्थमुपात्तं॥ असिद्धिं यो
जयति॥ अत्र हेत्वादिना विशेष्यवत्वविशेषणाभावकृतो विशिष्टाभाव इति दर्शयति चैवत्वादिना अवयवे तसि
द्धमप्यवर्त्येथो॥ न चैवमसत्त्वात्त्वेनैनान्वयः॥ हेतुविशेषणेति॥ दृष्टांतेन दर्शयति॥ यथा दंडमात्रेति॥ मात्रपदं तु दृष्ट

सत्त्वेपातिलक्ष्यते॥ स्वभावहस्तनंतरमनुभूयतइतिशेषः॥ विशेष्येति॥ विशेषणास्याप्रसहचरित्त्वेसतिविशेषवत्त्व
तद्वत्ताभावोविशेष्यासिद्धिः॥ नह्यविशेष्यासिद्धः॥ अत्रविशेष्याभावकृतोविशिष्टाभावइतिदर्शयति॥ नचविशे
ष्येति॥ स्वरूपमत्तानंतरमनुस्मनुषंगः॥ असमर्थेति॥ व्यभिचारागारकविशेषणाभावान्नहेतुरसमर्थविशेषणाः
समर्थविशेषणाइत्यर्थः॥ समर्थमिति॥ व्यभिचारकतालक्षणामितिशेषः॥ अकारणकत्वस्येति॥ अकारण
कभावत्त्वस्येत्यर्थः॥ अन्यथाप्रागभावेव्यभिचारवारकत्वेनासमर्थविशेषणतामा॥ वह्निमान्प्रमेयधूमादित्यादि
कमप्यस्योदाहरणंप्रागभावप्रतियोगित्वहेतूपंनिष्कलंकंवासाध्यं॥ स्वरूपासिद्धिरूपतांघटयति॥ स्वरूपेति॥ विशे
षणाभावस्यापक्षवृत्तित्वाभावंमत्वाशंकते॥ नाव्याप्तिगुणत्वस्यापक्षेसत्त्वेऽपिनहिविशेषणाभूतविशेषणात्त्वविरहा
त्विशेषणाविशिष्टगुणत्वाभावोवर्ततएवपक्षइत्यभिप्रायवांसाधनेसत्यमिति॥ कुतोननहिविशेषणाभित्याशं
कांपामाहानहेवेति॥ अन्यथेति॥ हेतोरसमस्यव्याप्यभिन्नस्यव्यवच्छेदेनव्याहत्याप्रयोजनमित्यर्थः॥ अत्रापेहेत्वनीय॥
धानेनेनधनवानितिवत्॥ तथाचाव्याप्यव्यावृत्तिरूपप्रयोजनवत्त्व॥ व्यभिचारवारकमेवविशेषणमितिभावः॥

गौ.त. ५८

87

दुष्टं वैकदेशिमतमाशङ्क्य निराकरोति चिन्त्यमिति ॥ असमर्थविशेषणस्यासमर्थविशेष्यस्य वा व्याप्त्यासिद्धिमध्ये नांतर्भावः । तस्य
मानान्तरलक्षणायोगात् ॥ विशिष्टस्य पक्षधर्मत्वाद्यभावकृतलक्षणायोगात् ॥ व्यर्थविशेषणस्य हेत्वाभासत्वासिद्धत्वे नैव तां त्रि
कारणं स्वेन हेतुना ॥ व्यर्थविशेषणं लक्षयति ॥ असमर्थेत्यादिना ॥ साध्यव्यभिचारादिविशेषणस्य तद्धेतुसमर्थविशेष्य ॥
लक्षणं स्पष्टीकरोति ॥ अत्रेत्यादिना ॥ विशेषणाभावप्रकारकत्वं तन्मात्रस्यैवार्थः ॥ विशेष्यवारणाय मात्रपदं ॥ मात्रस्यैवै
वकारः सफलतया नानिरर्थकः ॥ अथवा विशेषणसमर्थमेवेत्यत्र मेयत्वा योजनीयं ॥ समर्थत्वादिति ॥ व्याप्तिपक्षधर्म
कलमात्मनिति श्लिष्टार्थः ॥ अतएव व्युत्पत्तिहितानन्वयश्लोकोद्देशो जनानां कृतानां तत्र होपन्यस्तो नेन तत्र व्युत्पाद्यहिताय चहूतां महत्वा
मठतिशाब्दबोधः यथा किंतिनवद्रुपसिक्तोयं पादद्वयमं ववृहनुगुणां गुणहानिर्यमं ननु मंच हृदयनाथ कंठे मनस्सत्तमोहपं तिन्य
यनेन्नू वहृनुगुणं हृदयनाथं पादयोनेन किंतिनिवद्रुपद्यमं करेम न्दूपामनसस्तमोहपं कोपं मुचे वैभै डुंडुसागानां विनायियोज
नानां कृतानां पदानां तेनोपन्यस्तेन व्युत्पत्तिहितेत्यत्र प्रतिसंबंधानादृतं ते वैतत्वं शास्त्रेषु शाब्दबोधः नापाल हृतगुणसंहरति
॥ तेनेति ॥ अर्थप्रतिपद्यत्वहोरेति ॥ जनयेत्यनन्तमिति स्वचानेति ॥ पदस्येव महाकांक्षत्वमिति निमित्तेपदार्थातोरीति अर्थानन्तरस्यैवमु
रव्यसाकांक्षतायहेत्वाह ॥ अर्थानन्वयिनं चेति ॥ जनयंतामिति ॥ जनकीभूतज्ञानविषयतया प्रयोजकानामित्य
र्थः ॥ प्रतिपद्यमानेति ॥ प्रतिपद्यमानो ज्ञायमानः पदसमन्वयः ॥ एकपदार्थे अपरपदार्थसंसर्गो येषां तद्दशायां योग्यार्थाः त
त्प्रतिपादकानामित्यर्थः अत्रैकपदार्थे अपरपदार्थसंसर्गरूपान्वयः योग्यतायाः ज्ञानमात्रोपयुक्तं प्रदर्शयितुं प्रतीय
मानपदेनान्वयं चेति ॥ समयकृतत्वेनेति संकेतेशाब्दबोधविषयीक्रियते इत्यर्थः ॥ अनेनेति समूहः शक्तिः वर्णानां
समूहः शक्तिमत्वमित्यर्थः पदपदं धर्मिपरं अन्यथा कचटपेत्यादि निरर्थकवर्णसमूहे अतिव्याप्तिः विध्याद्यर्थे शक्तिश्चेत्के

गो.त.
७
7

कवर्णो ष व्याप्तेश्च ॥ ननु पदार्थानां समूहो न कारि स्मृत्यंस समूहत्वं च बहूनामेकज्ञानावच्छिन्नत्वं तच्चाशुतरविनाशि
नां कथमिति कारणं पदार्थानां संभवतीत्यत आह ॥ समूहतावेति ॥ विषयभावो विषयत्वं तथा चैकज्ञानविषयत्वं समूहात्वमि
त्यर्थः ॥ ननु वर्णानां द्वितीयक्षणोत्पन्नानां तृतीयक्षणनाशित्वेन तु ग्रहणाधिकरणपदे नैकज्ञानावच्छिन्नत्वमुत्तराशुतरवर्णि
धर्मितानां पदार्थानामिति मत आह ॥ एवं चेति ॥ क्रमवतामपि घटपटादीनां स्मृतिरूपतामेतो नो एकज्ञानीनतासंभवात् पु पदानां द
गपदुत्पन्नानामाशुतरविनाशिनामपि येषां द्विपोत्पत्तिमेककालग्रहात् तदुभयोर्गुणयोर्ग्रहणानां ॥ अनेकवर्णानुभवात् सं
भवतीति ॥ आवरणलौकिकप्रत्यक्षरूपस्यानुपवदस्य विषयजन्मनान्तियमादर्थात् पूर्वविषयनाशेन इदं संभवतीत्यर्थः
॥ अनुभूयेति ॥ स्थिति तह्येति शेषः तेन नन्वसामानाधिकरण्येन फलहानिः ॥ संस्कारस्य हेतुत्वेनेति ॥ सविषयकमात्रोपनीत
भानप्रसक्तिलय हे श्रमयथा हि संस्कारपदं संस्कारजन्यस्मरणपदं ॥ अन्त्यवर्णे सं च हुनेति ॥ तत्र समवायेन तत्यर्थः ॥ एतेन एम
विशेष्ये चरमवर्णे लौकिकप्रत्यक्षसामग्री विशेषणे स्मृतानवर्णेषु च नायकसत्वं दर्शितं ॥ ननु इदि पदस्ये त्यादेकमेवा ७
बोधकपदस्य लुप्तत्वेनानुभवाभावात् कथं स्मरणानुपपत्तौ ॥ अथो ग्रे द्विविधा कथमुपनीतभानमात्रमदेहित्यत आह ॥ प

दृष्टत्वादेनेति ॥ समयस्य शक्तेः ग्रहो यस्मादिति समयग्रहः ॥ शक्तिग्राहकं नास्ति किं को शाब्दिकं नेत्याह ॥ पदेति ॥ प्रा
तिविभक्त्यंतानि पुष्णंतेषां साधुत्वं स्याधुत्वानिरूपयंतेः पदेनेति तथा च व्याकरणं रूपं शक्तिग्राहकं शास्त्रमित्यर्थः ॥
नन्वनुग्रहोते न तत्स्तु भवजन्मसंस्कारसहकृतेनेत्यर्थः ॥ नतु तस्यापि विभक्त्यादेर्लोकोक्तिधायकस्य तत्रानुभवाद्देव संस्का
रेभवत्त्वत्यर्थः कश्चित्तु पदस्मृत्याहनेत्यस्याभिरांसमयग्रहेति ॥ तत्र शक्तिग्रहाधीनसंस्काराद्देः शाब्दबोधप्रसं
उपहृतानसहकारित्वान्न तु श्रवणेन्द्रियजन्यपदस्मरणं तु तन्नेत्यस्य श्रवणेन्द्रियसहकारिता ॥ मानाभावात् ॥ अग्रहीत
शक्तिकेनापि पदश्रवणाद्बोधः स्यादिति ॥ सद्वियमानं च उभयवर्णोरूपं असाधुत्वं पूर्वपूर्ववर्णात्मकं एतादृशानेक
वर्णविषयिणा पदप्रतीतिरूपज्ञानमानामिकातादृशेन श्रोत्रेन्द्रियेण जन्यतेइत्यर्थः ॥ प्रतीतिश्चाव्यवहितो
त्तरत्वसंबंधेन पूर्वविशिष्टा कार्यविशिष्टज्ञानकार्यत्वात् कारिकाविशिष्टहिन्द्रियेषु लेऽप्यनीतं विशेषणानि ये
पमासन्नइतिनियमानस्य इच सर्वेषां वर्णानां समूहालंबनरूपं ज्ञानमपीष्टं नं न तदानें च चरकालिकमानसोपनी
तमानं वेद्यं ॥ मानसेत्वनियमइत्युक्तेः ॥ परंतु यं यत्कारस्यानसंभवात् ॥ अंत्यवर्णसंबद्धेनेति ॥ श्रोत्रेन्द्रियेणेति चो

गौ·त·
८

लानुगा चरमवर्णो लौकिकसन्निकर्षः अयमत्र ज्ञानलक्षणेति प्रतीतेः। कश्चित्तु पूर्वगवर्णसंस्कारोद्बोध्य
नरूपकैकैकसमूहालंबनात्मकस्मरणोपनीतकं मुपसंघते इत्याहुस्तैर्व्याकरणाभ्युपगतस्फोटस्फोटोद्धारो बोधःमोति
न दृशा हेत्वत्तीनापि वर्णाफलेनातो हः॥ सकारादिति॥ पूर्वानुभवजन्यसंस्कारादित्यशादित्यर्थः॥ इदं च प्रत्य
भिज्ञानमित्यत्रत्वयेति॥ पूर्वस्मिन्नन्त्ये संस्कारासहकृतेनेति पूर्वानुभवात्संस्कारेण सहकृत्यापन्ने॥ पूर्वौवर्णस्ये॥ ति
॥ नत्कालसंबंधहृणान्तेन्यत्यर्थः॥ सावत्तत्कालपास्फुरन्नेवमेयेहेवह जन्तनित्रत्यक्षविषयामवत्तोवन दृश्यो
यातिभावः॥ बहुवर्णात्मकपदज्ञाने यावाति॥ मोवबहुपदात्मकवाक्योणीत्याह॥ ततइति॥ पदानुभवेति॥ पूर्वी
कपुनस्याअंत्यवर्णोविशेष्यकस्मरणोपनीतभानेनमानसोपनीतभानेनकपदानुभवेनजनितेनत्यर्थः॥ अंत्य
पदेति॥ अत्रपद पदं पदं त्यवर्णो पदं तितिन अंत्यपदां त्यवर्णे एवविषयो लौकिकविषयोपस्मतेन श्रोत्रेंद्रियेणोप
र्थे॥ अन्त्यवर्णस्यैवतदानी श्रोत्रेसंबद्धतया लौकिकप्रत्यक्षविषयतानामेषामितिभावः पदार्थेति॥ पदार्थानां
तत्कोपस्थापनानां यःप्रत्यक्षशाब्दबोधः तस्यानुरूपं संदेशोऽतहानंथह णोपदानां स्वजन्यज्ञानविषयीकरणंप

राम
८

स्यात्तेन स्वयंभावः॥ पदार्थानां त्वाद्धि द्विधा शाब्दबोधविषयता एका राजपुरप्रवेशन्यायेन अन्या खलेकपोतन्याये
न तत्राद्यपक्षे पदार्थानामेकावान्तरां एकार्थ्ये बोधे समानविशिष्टवैशिष्ट्यमिति॥ यावत्कार्थ्यं बोधो यते॥ द्वितीये
तु सर्वेषामेव पदार्थानां युगपदेकत्रैव यमिति॥ यथा युगपद्वैशिष्ट्ये बोधः॥ तथा चपादि राजपुरप्रवेश
न्यायेन शाब्दबोधः॥ न ह्यपदार्थानामपि विशिष्टस्य वैशिष्ट्यमिति॥ अवशिष्टद्वये तत्र ग्रहणं यदि हि युगपद्देशा
द्बोधः॥ न ह्येकपदार्थानामपि युगपद्वैशिष्ट्यमिति द्वारिकेति नुमुक॥ पदार्थप्रत्ययानुग्रहादेनेनेति॥ यथाऽङ्ग
नैवाङ्गत्वमङ्गत्वेन ग्रहणं प्रत्ययोऽस्त्येव स्वार्थकत्वमङ्गत्वं प्रतिप्रति पदार्थप्रत्ययस्याङ्गत्वे संहत्याभिधानानुपपत्तेः
स्वनेकपदार्थानां हि नानेति॥ तदप्रतीतेर्विशेषणं तेन नकोनहन्त्यां॥ पूर्वोक्तमुपसंहरन्ति॥ आमपुरुषे तेऽति॥ स्वा
र्थेतानर्थबन्तेस्यर्थेः॥ ननु समसमप्रमाद्धेकं रणेण ढकावप्रलिप्सा ह पदेषु यत्र तु हयराहि से मा मन्त्रका संस्कारादि
प्रयुक्ताया यत्तकानां तकानां तदेति योग्यतापदे नैव वारणात्प्रयुक्ते नापितामिस्यर्थः तेन न मोति श्लोका व्या
ख्याः न हेत्वं कमेणा समां कां स्वसन्त्वका कप्तानेसमसिगहानशक्तिस्य सोपदार्थोपस्थानिर्भीयनेतेन तस्ते षांतोऽयसंसर्गेति

गौ॰ ता॰
९७

होषतात्पर्येत्वासहकृतयानयाशाब्दबोधजनयतेनत्वायमानो स्वयं कारणमिति दर्शयति शब्दनामकं प्रमाणा
मिति वाक्यार्थज्ञानेनाहृते बाधार्थः प्राधान्येनसमानयेकमित्यर्थः वेदगतो ऽपि पश्चात्तात्पर्यसत्त्वाहित्यर्थः शब्दस्याप्रा
माण्यं कस्य दोषबाधीनं स्यात् लोके च स्वदोषस्यानियततया कापित्वप्रामाण्यं क्वचित्प्रामाण्यं वेदे तु निर्दोषत्वात् सर्वत्र
कोति तच्च कुविदृयिनाप्रामाण्यमिति लौकिकवैदिकशब्दयोर्विशेषं दर्शयति लोके त्वप्रमित्यादिना अप्रामाण्यं भवति प्रकृ
तवाक्यार्थेऽप्रामाण्यं नो भवतीत्यर्थः प्रमाणेति अप्रमेयः आप्तः सकलविज्ञविद्विषयेऽप्रमादिरहितः महेश्वरस्तत्प्र
माप्तः सर्वज्ञः सर्वविषयकयथार्थज्ञानवत्त्वेन प्रमादिरहितत्वात् दृष्टमित्यहृकमानेन तत्त्वे वस्तुसिद्धेः तथाहि क्षित्यादिक
सकर्तृकं कार्यत्वात् घटवदित्यनुमानादर्थतस्ताम्कचेत्प्रतिपत्तौ सिद्धिः देहानिमित्तकारणज्ञानत्वं पक्षत्वावच्छे
दकं तेनांकुरादेरपि पक्षतावच्छेदकाक्रान्ततया न व्यभिचारः देहहेतुत्वं तु कारणपदेहाज्ञानत्वं पिहायदेहानि
मित्तकारणाके युक्तमकर्तृकत्वं च दृष्टं पक्षधर्मपरिहरणानविकारी चेति सुज्ञानत्वं स्वत्रनुत्पादकत्वान सहकारिण राम
ज्ञानादेः सर्वविषयकत्वं च सिद्धं ज्ञानं प्रति शरीरस्य हेतुत्वात् तृप्तेः पूर्वं शरीरोत्पत्तेः संभावनीयत्वात् शरीरा ९

मात्राभावान्न चात्र शरीरजन्यत्वमुपाधिः साध्यव्यापकत्वाभावाद्धि केनचित्कर्माभावान्न हि तत्क्रियायां साध्याव्यापकत्वात् ।। न च
शरीरजन्यत्वेन हेतुनासमर्थितोपाधिः स्वजन्यत्वस्यैव व्याप्यत्वे शरीरेति व्यर्थविशेषणतात्वान्न च कर्तृत्वव्यापकं शरीरमिति विश
रीरस्याभावात् कर्तृत्वाभावेऽपि जीवविशिष्टाभावं समत्वाद्बाध इति वाच्यं शरीराभावेनेश्वरकर्तृत्वाभावसाधने धर्मिग्राहकतया
बलीयस्त्वान्न च कार्यत्वमसिद्धं ।। सावयवत्वेन तदनुमानात् नहि तदाहितांकुरादिनाकार्यत्वबोधनासिद्धिरित्याह किं पादे ह
कर्तृकं न स्यात्तदाजन्येन तस्मात् तदङ्कुरादि कूलस्य कर्ताबोध्यः स्वदेहं पश्यति स्वप्रभवो मनसः सर्वं जनितदेहादि शाब्दोपास्मि नैव प्रमा
णमिति विरूपास्त्वस्मत्कर्तृनमद्युक्तिमुक्तावल्यामनुसंधेयानुभूयमानिरीक्षिति स्वात्मकालादितिप्रव्यार्थतानं चस
युक्तशब्दत्वादिलिङ्गैः एतेनेश्वरे प्रमाणान्तरमप्यनुमितं तथाहि वेदः कर्तृजन्यो वेदो गुणवत्प्रयोज्यः प्रमाणत्वात्समन्वत्वस्य
माणवत्तच्छब्दप्रमाणानुगुणो वक्तृयथार्थवाक्यार्थज्ञानं तदङ्कुरादीनीन्द्रियकार्यार्थोऽपि स्वेच्छाधीनविलक्षणकार्यत्वयोगो वाक्यया
र्थज्ञानं स्वदेहजन्यस्यैव वक्तुः संभवतीति वेदवक्तासर्वज्ञः ईश्वरोऽस्मदादीनामभावः एतेनेश्वर इतीन्द्रियादिभिर्योग्यतया दाहि किं न प्र
माणं न प्रमाणान्तरयाथार्थ्ययावाधापत्रीयप्रमाकरणत्वमादिति शेषः ननु मीमांसकादिभिरीश्वरं गृहीतं उक्तप्रमाणं चतुष्टयातीतं क

गो·त· १०

10

प्रमाणान्तरत्वातिरिक्ततयेनेन दूषितं प्रत्यक्षमेकवाक्यताकाः कल्पान्तरमुपात्तं पुनः अनुमानं वक्तव्याहेतुः केचित्तु ध्वंसवत्ते अपि सा
ध्येकदेशिनोऽप्यनुपमानं तर्केवन अर्थापत्त्या सहैतानि चत्वार्यपि प्रभाकरः अभावषष्ठान्येतानि मानानि वेदान्तिनस्तथा
संभवैतिह्ययुक्तानि तानि पौराणिका जगुरिति तथा च पूर्वपक्षसूत्रं न चतुष्ट्वमैतिह्यार्थापत्तिसंभवाभावप्रामाण्यादिति
न चाहुःप्रमाणान्तरत्वमिति सूत्रतः संज्ञाभेदमात्रेणातिप्रतिविधानस्याप्रतिकर्त्तव्यत्वप्रमाणेऽष्टर्थापत्त्यादीनामन्तर्भावेन विशा
दिसदर्थः अन्तर्भावमेव दर्शयितुं प्रथमतरमर्थापत्त्यैकम् शङ्कां दर्शयति नान्विति अनुपपद्यमानेति तदभावव्यापकाभू
ताभावप्रतियोगित्वं तेन विना अनुपपद्यमानत्वं तत्सामानाधिकरण्याभावप्रतियोगित्वं तदुपपादकत्वं तथा च अनुप
पद्यमानो अर्थो दिवाभोजनाभावविशिष्टपीनत्वं तत्तज्ज्ञानजन्यत्वदुपपादकस्य रात्रिभोजनस्य उपपादकार्थस्य ज्ञाने तदेव अ
र्थापत्तिरूपप्रमाहृद्यफलं तत्करणं तु अनुपपद्यमानार्थज्ञानरूपानुपपत्तिः लक्षणं लक्ष्ये योजयति तथा हीति दृ
ष्टः श्रुतो वेति शेषः ज्ञातेऽथ केनेशाहृदि वाक्यार्थः एतेन अनुपपद्यमानार्थदर्शनमुक्तं तज्जन्यमुपपादककल्पनमाह रात्रिभो तम १०
जनमिति तथाविधपीनत्वरूपार्थस्यानुपपद्यमानतां दर्शयति दिवा अभुञ्जानस्येति रात्रिभोजनमिति रात्रिभोजनाभा

ठ्व्यापकीभूताभावप्रतियोगित्वात् तदर्थः तादृशपीनत्वस्य रात्रिभोजनं विनानुपपद्यमानत्वे रात्रिभोजनस्य तदुपपादक-
त्वं स्फुटमेवेति तन्न दर्शितं उपपाद्यं हरति ज्ञानं इति वक्ष्यमाणहेतोः। तदर्थः अभ्युपगमे तदर्थः प्रमाणाप्रमे तदर्थः अनुपपत्त्या
नुपपन्नेरेतादृशोपपत्तिप्रमाकरणत्वात् तादृशज्ञानतः दिवाभोजनाभावविशिष्टपीनत्वस्य रात्रिभोजनस्यैवेति तत्तुल्यदर्शितत्वे सति तत्तुल्यत्वापत्ते
नीनत्वे प्रत्यक्षादिविषयविषयकत्वात् तत्तुल्यत्वापत्तेरानीतत्वे प्रत्यक्षविषयकसंस्कारजन्यत्वेन इति हेतुर्दृष्टदृष्टागोचरत्वे रात्रिभोज-
नविषयके प्रत्यक्षस्य हेतोर्व्याप्तिग्रहणावसरत्वेन ईदृशप्रमाणजन्यत्वेऽपि प्रत्यक्षे सन्निहिते न तुल्यत्वाऽन्यत्प्रत्यक्षविषय-
रात्रिभोजनविषयकत्वात् इति सिद्धिकारणात् न तुल्यत्वापत्तेरिति न तुल्यत्वापत्तिकालीन रात्रिभोजनमात्रप्रत्यक्षस्य न तदनुमितायादि-
विषयरात्रिभोजनविषयकत्वात् न दोष इति तदानीतत्वेऽपि तादृशपीनत्वादिप्रत्यक्षे व्यभिचारात् व्यतिरेकव्याप्तत्वेनाप्यादि एतस्यै-
व हेतोर्विशेषणतासिद्धिर्नाह रात्रिरात्रिभोजनस्यैवेत्यादिना रात्रिभोजनस्य न तुल्यत्वापत्तेरानीतत्वे प्रत्यक्षाविषयत्वा-
त्तादृशप्रत्यक्षाविषयविषयकत्वं प्रत्यक्षेणैव सिद्धिरिति भावः रात्रिभोजने तदानीं असिद्धिः प्रत्यक्षेऽन्ते कश्चित्पक्षान्त-
रप्रत्यक्षविषयताऽनेन तत्रानुपपत्तेर्ज्ञानरूपत्वात् रात्रिभोजनाऽव्यापनयोर्दिवाहने पीनत्वे प्रत्यक्षत्वेऽनुमानविषय

नाशत्वाभावादेवनशाब्दबोधविषयतानुपपन्नमितेअसाकांक्षित्वेनान्वयितेगेश्यंएतेनार्थापत्तेःप्रत्यक्षादिभिन्नत्वेसा
ध्येरात्रिभोजनस्यप्रत्यक्षाद्यविषयत्वंयत्प्रत्यक्षान्तर्हितंतुदृष्टान्तेप्रत्यक्षसाध्यसाहितनपुरुषांतरप्रत्यक्षादिविषयत्वानरा
त्रिभोजनस्यानेपिदृष्टमसिद्धंहेतोर्ह्यन्यथानुपपत्तिरूपस्येवसाध्यसाधकत्वान्नदृष्टान्तादिदूषणोपन्यासंनन्वदृष्टार्थप्रत्यक्षा
द्यविषयकत्वमेवरात्रिभोजनस्याप्रसिद्धमितिचेत्प्रागभाववदोरात्रिभोजनस्यानुमानेनेतिअनुमानेप्र
योगमाहअयंमितिदिनमात्रभोजनस्यानुमानेनेतिअनुमानप्रयोगमाहअयमितिदिनमात्रभोजिनिर्दिष्टत्वेनस
मितंरात्रावाहारापलब्धेन्तेदिवाभोजनाभाववैशिष्ट्यंआहारोरात्रिभोजिनिरूढशेव्यभिचारात्तात्पर्यविशेषणे
गोगासघजमपीनत्वपरत्वेनाहारोरात्रौभोजिनोरपिपीनयोर्योगिरोगिणोर्व्यभिचारात्कारणांपीनत्वंस्थौल्यंशरी
रारंभकोपचयरूपंहेतोर्नैतीरेकेव्याप्तौउदाहरणमाहयन्नेवंतिनवायमितिनायंदिनभोजनाभाववानि
त्यर्थःतस्मादितिरात्रिभोजनवानित्यर्थःअर्थापत्तिरितिअत्रोच्छेत्तिविशेषःअनुपलब्धेरतिरिक्तप्रमाणतां
शंकतेनन्वभावेतिप्रतियोग्यनुपलंभाभावावसरःमित्यर्थःअनुपलब्ध्याभावग्राहकत्वोपगमादित्याभिप्रायेनदर्शयति

तथाहि नाहिना घटानुपलब्धेति न तु घटाभावबुद्धौ घटोपलब्ध्यादेर्विरहे हेतुता अभावत्वप्रकारकलौकिकप्रत्यक्षे
त्वावच्छिन्नं प्रति प्रतियोगितावच्छेदकप्रकारकप्रतियोगिज्ञानत्वेन हेतुत्वात् घटत्वप्रकारकज्ञानाभावे घटो नास्ती
ति विशिष्टवैशिष्ट्यबोधानुपपत्तेः एवं प्राचीनमते अत्यन्ताभावबुद्धिं प्रति प्रतियोग्यारोपस्य हेतुत्वं प्रसक्तं हि प्रति
षिध्यन्त इति नापानत्वमुक्तं घटानुपलब्ध्या घटाभावो निश्चीयत इति चेन्न सत्यं किंतु घटवद्भूतलमिति ज्ञान
सत्त्वे घटाभाववद्भूतलमिति निश्चयानुपपत्तिः भूतलत्वावच्छिन्नधर्मिताकदोषविशेषाजन्यलौकिकसन्निकर्ष
जन्यघटाभावो निश्चयं प्रति तादृशधर्मिताकदोषविशेषाजन्यघटवत्ताज्ञानत्वेन प्रतिबंधकत्वात्तादृशघटो
पलंभाभावदेः तादृशघटाभावबुद्धिं प्रति हेतुत्वमस्त्येवोक्तं प्रतियोगिविरोधिज्ञानादिहेतुतायां धर्मितावच्छेदकवि
षयत्वनियमाभावात् प्रतियोग्यारोपस्य हेतुत्वे प्रमाणाभावाद्द्वे हि न दुर्वेशो व नयात्वात् अत्र न यांकितावच्छि
न्नधर्मिताकस्य दोषविशेषजन्यस्यादिन्द्रियोहाहो तदिन्द्रियजन्यबाधाभावकाले लौकिकसान्निकर्षजन्यस्य चाहा
र्यस्य वघटाभावनिश्चयस्य तादृशघटवत्ताहि निश्चयकाले विदृशीनात्मनि वश्यतावच्छेदकेतावच्छिन्ना अनुप

गो·त·भा· लब्धिरिति अस्मदुक्तविधया विवक्षितानवस्थितिरिति लक्षणानुपलब्धिविशिष्टोपलब्ध्यभावः अनुपलब्धिरित्यर्थः।
१२ ननूपलब्ध्यभावोऽनुपलब्धिरित्यत्र योऽभावः प्रमाणः तथा सत्यत्र यत्र सत्र उपलब्धेः अभावप्रमाणत्वेनेति घटोपलम्भाभावप्रमा
12 णत्वेऽप्यर्थः तु भूतलादिरिति घटाभावप्रमाकारणतावच्छेदकस्योपलम्भाभावत्वस्यैव अभावप्रमाकरणत्वे लाघवात् अत्र हि तारतम्यं गौरव वा
दिभावः केवलानुपलब्धिमात्रं नाभावग्राहकं अत एव कोऽपि घटानुपलम्भेऽपि घटाभावप्रमाणत्वेन किं तु योग्यानुपलब्धेः उभय
वादिसिद्धाभावप्रमाकारणतावच्छेदकस्योपलम्भाभावत्वस्यैव अभावप्रमाकरणत्वे लाघवात् अत्र हि तारतम्यं गौरवादिभावः केवला
नुपलब्धिमात्रं नाभावग्राहकं अत एव कोऽपि घटानुपलम्भेऽपि घटाभावप्रमाणत्वेन किं तु योग्यानुपलब्धेः तथा योग्योपलम्भाभाव
नित्यो नित्यत्वसंजनकसंसर्गिनोपलम्भकलमनुपलम्भाभावस्मताद्दशयोग्यानुपलब्धिस्तु इति द्विषयाणां सहकारित्वात् तेषा
मप्यभावग्राहकत्वानवस्थितेरिति किं सत्वादिरिति मनसि निधाय दूषयति अनुपलब्धेर्योग्यतानासंपन्न येष्वति योग्यानुपलम्भा एम १२
ताहकतर्कमाह यद्यत्रेति न निर्विषयाणामधिकारस्य ग्राहकस्य नयनात्मिके कयोऽत्र भीनार्थताव्याभावग्राहकत्वं अभावग्र
हे अनुपलब्धिरेकारणं तथा चानुपलब्ध्या घटाभावग्रहे सति तेनैव प्रमाणसत्या घटाभावबद्भूतलमिति वा तु योजनाति

नभावे एवं सत्यभावेन सह इन्द्रियस्य सन्निकर्षाभावे विशिष्टज्ञानानुत्पत्तिरिति प्रायो लोके शंकते न चेन्द्रियकारणतेति स्वसंबन्धस्ये
न सह संबंधवतो घटस्य विशेषणतया ज्ञानजनकत्वात् प्रत्यक्षजनकानीत्यर्थः ॥ अत्रानुमानप्रमाणमाह इन्द्रियाणामित्यादिना स्व
निष्ठविषयनिष्ठसंयोगसमवायादि षट्संनिकर्षाणां तज्जन्यज्ञानजन्यप्रत्यक्षसामान्यकारणानीति साध्यार्थः एतेना
भावेनेन्द्रियस्य विशेषणतासहकृतसन्निकर्षो यादृक् मतेऽसिद्धसाधनं तथा भावसहकृते प्रत्यक्षकारणत्वासिद्धसाधनं इं
द्रियविषयत्वावच्छेदेनेन्द्रियस्य प्रत्यक्षकारणत्वविवक्षायां भावस्येन्द्रियविषयत्वे सिध्यसिद्धिव्याघातादिति निरस्तं ॥ विष्ट
कारणेषु दृष्टान्तो व्यभिचारवारणाय ज्ञानपदं ॥ प्रत्यक्षपरत्वेनानुमित्यादिकारणे व्यभिचारः ॥ असिद्धवारणाय
विशेष्यं ॥ चक्षुःसंयोगस्यापि आत्ममनोयोगादौ व्यभिचारवारणाय व्यापारवदिति आलोकवदिति आलोके स्वा
विषयसंयोगद्वारा प्रत्यक्षहेतुत्वात् आत्ममनोयोगस्य शरीरात्मयोगद्वारा प्रत्यक्षहेतुत्वाच्छरीरादौ व्यभिचारवा
रणाय पदमिति अत्र साध्यं पूर्ववत् इन्द्रियत्वादित्येव हेतुः कचिदिन्द्रियत्वादिति हेतुस्तु नाकारः मनसो विषयाधव
त्वेन व्यभिचाराभावात् इष्टोत्पत्तिस्तत्रापि साध्यत्वे दर्शयति त्वगादीनामिति उभयवादिसिद्धेति ननु त्वगिन्द्रियेणास्य शी

गौ·न·
१२
13

घमावस्यैनेयापिकमनेयहान्नाहशासन्निकर्षेजन्मत्वजन्मप्रत्यक्षमामास्मकल्कहूपमाधाभावाकेश्यमुक्तमुभयवाहिसिद्ध
लमिति चे द्रावप्रत्यक्षमाहपनत्वाल्लेश्रभावप्रत्यक्षांशेप्रमाहण्णांगल्लं श्रुतं इद्रियेमामास्मसौवाभावग्राहकत्वमुपा
हपहयेतिनवेद्रियाभावयोहिंत्याहिनासंबंधोसंबंधत्वहृत्णाकांतोह्यत्वर्थः नत्नाविनिनवोर्भावमात्रधर्मत्वाहितिभावः
संबंधोनभवतीतिसंबंधत्वहृत्णानाक्रांतत्वाहित्यर्थः नहिवहशेवतिमित्नोभावेतितुभयाप्तिनश्चात्मावेकश्चेत्वम
याप्तिनेकःमिनश्चात्मात्मवेतिनथानत्वाभावाहित्यर्थः ननवत्रत्मवाधिमित्नत्वेमानिएकत्वेमतिसंबंधिद्व्याप्ति
नत्वमितिलक्षणाहिद्धतंत्रविशेषणाद्व्योहणाहानेकिमर्थयुभयानिमेननद्भमणमित्नोभवत्वेवश्रमहेश्वास्वणस्वभि
भावासंभवानएवंएकोपिभवतिश्रनेकत्वेपोकस्याप्यभयाप्तिनत्वाभावाहितिवेद्वुयनेकणालद्व्याप्तिनेस्येकस्यकपाल
द्व्येसंबंधताबाहणासंबंधिमित्नत्वेमतीतिश्रत्रसंबंधिपहमपोगहूपसंबंधाश्रपनतयाद्व्यणहेनद्व्यमित्नत्वे
मतीत्यर्थः एवंतुभयकर्मजनकत्वेमत्याद्व्याप्तिनस्यकर्मद्व्येस्मत्वेद्वपसंबंधताबाहणायएकत्वेमतीतिघटह
पस्यघटपटसंबंधताबाहणायविशेष्यंश्रत्रसंबंधिद्व्याप्तिनत्वउभयत्वपर्याप्त्यधिकाहणाभूतसंबंधिपर्याप्तद्विक राम
१२

त्वं एतद्व्याप्तावस्यैकत्वविशेषणतां एवमपि विधित्वादि एतत्सकम्भवति व्याप्तेः संसर्गोऽपि भिन्नत्वेनापि विशेषणतायां ए
कत्वेन हेतुत्वाद्भिन्नत्वादिभिन्नत्वाभावित्यर्थः तत्र तत्र विशिष्टप्रतीतिनियामकत्वं संबंधित्वं संयोगादिसमवायत्वं तत्संबंध
त्वमिति निरूपितं नायं संबंधित्वमिति तत्राप्यतादृशानामित्यर्थः संयोगे संबंधत्वलक्षणं हेतुतादृशविशिष्टविशेष
णविशेष्यभावे पूर्वोक्तसंबंधत्वाभावे संबंधलक्षणाभावे न हेतुतेति न चेति तयोरिति संबंधलक्षणाक्रांतं तद्द्वर्थः
संबंधलक्षणाक्रांतलक्षणे कालिकादिसंबंधेऽनावेत्ति न भिन्नत्वेनाप्युभयानिष्ठनत्वन च एकत्वामिति तत्राभिन्नत्वाभावं यद्योग
नो दृश्यत इति दंडपुरुषयोरिति विशेषणविशेष्यभावो विशेषणत्वविशेष्यत्वे नाप्यदंडपुरुषयोरपीत्यर्थः अ
भेदमेव दर्शयति न हीति अर्थानामिति दंडपुरुषसंयोगवद्भिन्नपदार्थो न हीत्यर्थः स्वरूपभेदेऽति वाच्यमिति तु
द्भिन्नत्वं विषयताविशेषो वा विशेषणत्वं विशेषणतास्वरूपाणामिति शिक्षामित्यर्थः एवं चेति धानुयोगित्वं विष
यताविशेषो वा विशेष्यत्वं विशेष्यतानामिति शिक्षामित्यपि चेद्धं प्रकृते योजयति अभावस्यापि विशेषणतादिभूत
त्वे घटाभावस्य तादृशज्ञाने अभावस्य विशेषणत्वे विभूतत्वाभावयोर्विशेषणत्वयोः संबंध इति भावः अभावस्यापि विशे

गौ॰ त॰
१५

15

षणात्वस्याभावातिरिक्तरूपतार्थं नानुसंभवतीत्याह न च घटाभाव इति । आद्येति समवायाभावो हि घटाभावे द्रव्यादिप्रं वानो
मसंभवः समवायस्यातिरिक्तत्वे च ध्वंसस्य समवायिकारणनाशनाश्यत्वे घटध्वंसस्य कपालनाशादिप्रसंगात् इत्यतिरिक्तरूपतार्थो
नत्कल्पने गौरवात् अभावत्वरूपेण अभावीयविशेषणतेति भावः तदेव दर्शयति तस्मादिति अतिरिक्तविशेष
णत्वाभावादित्यर्थः स्वरूपेण तद्बुद्धिजनकत्वं स्वविशिष्टबुद्धिजनकत्वं तद्रूपं परभावस्य स्वरूपं तदेव विशेष
णत्वमित्यर्थः घटाभाववद्भूतलमित्यादौ स्वविशिष्टबुद्धिजनकत्वमेव घटाद्यभावस्य विशेषणत्वेनातिरिक्त
मिति भावः ननु मास्तु भूतलेन सह अभावस्य विशेषणतासंबंधः अतिरिक्तत्वाभावात् व्याप्यव्यापकभावस्तु संबं
धो विघटत एव भूतलव्यापकत्वात् अभावस्येत्यत आह एवं व्यापकत्वेति तस्य स्वरूपातिरिक्तत्वेनाविन
र्कनीयत्वात् इत्यर्थः आदिपदात् घटाद्यभावादयः संगृहीताः तत्र व्यापकत्वस्य अनतिरिक्ततां दर्शयति स्वेति स्व
व्याप्यकालत्वं तेन प्रतिबद्धबुद्धिः विशिष्टबुद्धिः अग्निव्याप्यवह्निरिति बुद्धिरिति यावत् तथा च घटादीनां व्यापकत्वं
विशिष्टबुद्धिजनकत्वरूपेण स्वरूपं तदेव व्यापकत्वमित्यर्थः ननु तादृशविशिष्टबुद्ध्यादिजनकत्वमेव व्यापक

राम
१५

त्वादित्युक्तं तथा च जनकत्वस्य जनकतानिरूपितत्वेन व्यापकत्वादेव्यनिरूपितत्वमाधानं न हि एवं सत्येतन्नत्राह कारण
त्वमप्यनियतत्वादिनोऽकारणत्वमपि कार्यानुकूलत्वेन व्यवस्थितिरिति किंतन्त्वहं एवं कारणत्वहं एवमेव ज्ञानतिनिरूपितत्वमित्यर्थः।
इत्यवकारणत्वत्वं तं प्राग्भावस्यान्त्यातं न त्वभावसंबंधत्वेनाभिमतस्य विशेषणाविशेष्यभावस्य संबंधत्वेन हारणा
हितत्वं च यस्य स्वातन्त्र्याप्याभिन्नत्वं दर्शयितुं उचितं व्यापकत्वकारणतानामतिनिरूपिततारं एवं इत्येकुत्रोपयु
क्तमित्यपेक्षायामाह अभावस्यापीति अभावत्वेनाभावस्य भूतत्वव्यापकं तथा व्याप्यव्यापकभावस्यानिरूपितत्वं
एवं उतं कुत्रोपयुक्तमित्यपेक्षायामाह अभावस्यापीति अभावत्वेनाभावस्य भूतत्वव्यापकतया व्याप्यव्यापकत्वस्य
निरूपितत्वे व्यापकत्वस्यापि तत्त्वापत्तेरत इति हि कारणताखंडनमिति पूर्वमस्माद्दर्शितफक्किकाभावार्थप्रकारेणेन
प्रकटीकृतम् इति बोध्यं नन्वेव व्यापकतावच्छेदकतया कारणतावच्छेदकतया भावत्वादेः सामान्यस्य नैयां सं
बंधस्य च समवायस्य च अभावेऽव्याकारे न वाभावेकस्यापि तत्रार्थस्येत्याह पूर्वोक्तविशेषाधइत्यत आह न
त्वभाव इति अभावेऽपदार्थान्तरस्य पूर्वमेव निराकृतत्वात् अभावत्वादिके तु न सामान्य किंतु नैव भावस्य

गो॰त॰
१५
15

रूपं व्यापकत्वात् हि वर्तत इति भावः स्वसंबंधिभिन्नत्वलक्षणस्य लक्षणांशस्य प्रकृते अभावं व्यवच्छेद्यमुपसंहरति नहि
गमितिः संबंधलक्षणात्मकोभयाश्रितत्वमात्रो विशिष्टविशेषणताया आत्मनीति दर्शयति नाप्युभयेति विशेषणविशे
ष्यभावस्यैकत्वे उभयाश्रितमपि स्यात् न हैवं नास्तीति दर्शयितुं स्वसंबंधलक्षणांतर्गतैकत्वमप्यत्र नास्तीति
दर्शयति नाप्येक इति यथा घटपटयोर्भावयोर्द्वित्वपटत्वमित्यत्रैव घटत्वरूपधर्मद्वयप्रतीतिस्तद्वद्वाद्यतिभा
वः विशेषणविशेष्यभावयोः संबंधयोर्धर्ममुपसंहरति द्वावेतावितिः एकोऽप्येति चकारो नुक्तसमुच्चयेति
तेनैतौ संबंधाभिन्नौ उभयानाश्रितौ स्वसंबंधिभिन्नोभयाश्रितत्वसंबंधत्वयोगोऽप्यं अतो विशेष्यविशेषणा
भावस्य संबंधानाभावमुपसंहरति तस्मादिति संबंधलक्षणायोगादित्यर्थः व्यापकत्वाद्वानामपि तत्त्वमुपसंहरति
एवमिति न संबंधा इति विभक्तिपरिणामेनान्वयः न नु तर्हि प्रामाणिकानां तत्र संबंधव्यवहारः कृत इति वेत
गौण इत्याह संबंधशब्देति गुणयोगमाह उभयेति उभयनिरूपणीयत्वेन विशेष्यविशेषणादिरूपो राम
उभयविषयकत्वात् विषयत्वेन तस्य धर्मेण मुख्यत्वस्य योः समानधर्मेण अर्थः यथा दंडिपुरुषसंयो १५

नस्य द्रंउं पुरुषोभयनिरूपणत्वं तथा द्रंउं निष्ठविशेषणतात्वस्यापत्तिर्भावः अभावे हेत्वेन्द्रियाद्याश्रयान्वयपूर्वं क तु प
लंहृएति तथा चेति समानमिति भूतले घटाभावं पश्यामीति सार्वलौकिकानुभविताभावप्रतीतेरिन्द्रियान्वयव्य
तिरेकानुविधानतस्तदनुपलब्धेर्लक्षणत्वेऽपि वस्तुनिष्ठपित्वपातिमाहिरूपहोषवशात्तीतः शेत्व इति भ्रमवत् प्र
त्यक्षरूपाभावज्ञानशालैरन्तोहि भ्रमदर्शनाच्च अभावग्रहस्येन्द्रियजन्यत्वे अवच्छेदकभङ्गकव्याप्तोहितोव्याप्तिका
रणाद्गायसाध्येनादृशसन्निकर्षजन्यत्वजप्रत्यक्षत्वत्वजन्यभावप्रत्यक्षसामान्यकार्यतावच्छेदकसाध्यं च रूप
मितिभावार्थः भावाविधित्वाभावादितिभावघटितसाध्यनिरूपितत्वादित्यर्थः भावघटितसाध्यमेवदर्शयति
भावमितिभावं प्रकाशयन्तु प्रत्यक्षीकुर्वन्निन्द्रियं प्रामाण्येन तादृशत्वसन्निकर्षविशिष्टमेव भावं प्रत्यक्षरूपवि
षयीकरोतीति नासंनिकृष्टं भावमित्यर्थः तेन स्वजन्यभावप्रत्यक्षसामान्येन तादृशसन्निकर्षजन्याभावात् भावग्राहि
साध्यता अभावप्रत्यक्षलेशं च नियमो नास्तीत्याह नत्वभावमपीति एवमेवप्रकाशयतीति पूर्वेणान्वयः
तर्हि समभावं न प्रकाशयेदित्यत आह अभावमितिविशेषणाविशेष्यभावसम्बन्धेन तदाहित्येत्यर्थः अग्राहिपरा

गौ.त.
१६
16

त्संबंधविशेषणतानिरूपीयत्वः प्रकाशयतीत्यनुवर्त्तते सिद्धांतइति सिद्धांतपदेनात्मत्वमूर्त्तत्वममूर्त्तत्वं तथाहि ॥
अत्रसंयोगस्यासंबंधत्वेपि तादात्म्येनेति ॥ ज्ञानमेवप्रकाशयतीत्यत्रापि पदं ननु लौकिकालौकिकसाधारणं विषय
सन्निकर्षविशिष्टस्यैवाभिधानात् । अभावस्यापि संयुक्तविशेषणतानिरूपितेन्द्रियसंबंधत्वात् तत्र च विशेषणत्व
स्य संबंधलक्षणाक्रान्तत्वाभावात् संबंधत्वेनाप्रतीतेस्तु कथमेव तदिन्द्रियसंबंधाद्दृश्यमेव संबंधः न लक्षणमकर्त्तव्यमिति
रुअत्रज्ञानाद्दोषात्कानपेक्षितत्वविशिष्टबुद्धित्वात्संबंधत्वमित्यनुवर्त्तनात् किंचघटाभाववद्भूतलमित्यादिप्र
तीतेः । भूतलाभाववत्संबंधविषयत्वस्य सर्वतादृशसिद्धत्वात् तादृशसंबंधे संबंधत्वलक्षणस्य संबंधत्वलक्षणासंयोगव्याप्तिस
वरूपा । ननु तत्र संबंधत्वाभावं बोधयत्वमितिभावः । कोऽपि तु अभावत्वं तादृशसाक्षात्संबंधत्वलक्षणं तथापि तत्त्वविशेषणत्ववि
शेष्याभावदेशान्तिरिक्तस्यैवानुपगमादिति वदंति अत एव विशेषणतायाः संबंधत्वकल्पनमात्रमाश्रित्य ॥ स्वसंबंधत्वा राम
भाववत्त्वेनेति ॥ स्वनिरूपकत्वेनेति । यदि अंशे वह्न्यभावप्रत्यक्षे तदा संस्थानाभाववत्त्वमाह । समवायेनेति । भूतलेघटा १६
त्वाभाववदित्यादि इत्यादावात्मत्वाभावस्यादिना सामान्यादेः परिग्रहः । विशेषणतयेति । विशेषणताव्याप्यसंबंधेन संबद्धस्यैवाभा

वस्याग्रहणमिति कुतो ऽभावधीभावग्रह इति भावः । तद्व्यावर्तकविशेषणतायाः सम्बन्धत्वस्वीकर्तृमते । अन्यथाऽक
विन्वटाभावस्याप्यकविन्दुसंयुक्तस्यानुपपत्तेरित्याह यस्य समवायेति । ततः किमित्यत आह । यत्रोभयत्र योरिति त्व
विशेषणतासम्बन्धता नैयायिकैरस्माभिरिष्टः । अभावप्रमेयत्वसमवायस्यानुपपत्तिरूपः । तथा तत्र तत्र सत्यपि का
रणीभूतविशिष्टसमानाधिकरण्यः न च येनैव सम्बन्धेन यत्किमपि सर्वमुक्तमिति न च इच्छाद्यर्थः । तस्मादभाव
प्रत्यक्षे ऽपि कुम्भाभावे ऽवंदियार्थाकारणतानां तु प्रमाणत्वं तत्र तथात्वं नैयायिकाहितिभावः । एवं संभवस्याविनप्रमाणानां
त्वं तथाहि सहसत्त्वकानिमुक्तेऽपर्यवसानं तत्वज्ञानेऽप्यभवतीति तत्वमहत्वस्यादि तथा व्याप्यतयानुमितिहेतुमितिर्वा अनुमा
नेऽतर्भावः तथेहवेद्ये यज्ञः इत्यादिहेतुर्धैतिप्रत्यक्षानिषिद्धीति प्रयत्नोक्तप्रकारेणाप्रमाणरूपस्य यथार्थविशेषप्रमाणम
ध्येतर्भावः अयथार्थत्वप्रमाणमेवेति वैध्यप्रमाणप्रसंगात्प्रामाण्यस्यापि तो ग्राह्यत्वं च वस्त्वापत्तिरिष्यते तु दूरे
तथा हि शब्दावधानात्पर्यन्तं निरूपणाप्रतीति जानीते इदमिति वस्तु प्रमाणप्रामाण्यस्याप्यतो ग्राह्यत्वमित्यर्थः । निरू
प्यते परं तु ज्ञानिनिराकरणपूर्वकं प्रतिपादयते नैयायिकमतमवलंब्य विचाराणां भूतविषयप्रदर्शनं करोति तज्ज्ञानादि

गो.त.
१७
17

ति जलत्वादिना नस्य प्रामाण्यं जलत्वादिविशेष्यकत्वावच्छिन्नजलत्वप्रकारककत्वादिकं अवधार्य यथार्थप्रवृत्ति-
जनकत्वादिना पूर्वं वक्ष्यमाणप्रामाण्यकज्ञानसजातीयत्वहेतुनाऽनुमायेत्यर्थः कश्चिदिति अभ्यासदशापन्नज्ञा-
नवानित्यर्थः अभ्यासदशापन्नज्ञानत्वं च गृहीतप्रामाण्यकज्ञानान्तरतुल्यत्वं अत्र प्रवृत्तिं प्रति प्रामाण्यावधा-
रणस्यैव हेतुताभ्युपगन्तृणामाह कश्चिदिति अनभ्यासदशापन्नबुद्धिकस्येत्यर्थः तत्त्वं चागृहीतप्रामाण्यसजातीय
ज्ञाने तत्प्रामाण्यकत्वसंदेहे निरुक्तज्ञाने प्रामाण्यसंशयेऽपि संदेहादित्यर्थः अत्रापाततोऽवधीरयं च भी प्रामाण्यसंदेहोत्तरका-
लेऽप्रवर्तनं इति यावत् प्रामाण्यज्ञानस्य प्रवृत्तिहेतुतायामनुभवमात्रं शक्तिलंभे संवादे प्रमाण्यज्ञानतद्ग्रहाभावार्थ-
स्य प्रमाण्यज्ञानतरस्याग्रहस्यैकस्य वा हेतुत्वादिविषयाकृतस्य जलादेः स्पर्शनादिविषयलेशतीत्यर्थः अवधारय-
तीति यथार्थप्रवृत्तिजनकत्वेन हेतुना अनुमिनोतीत्यर्थः दृष्टमुपलब्धं जलाद्यनुपलंभे वा प्रामाण्यसंदेह
नारयतीति यो ध्यं भक्तगतिरिति नैयायिकमतं इति शेषः ।। एतेन प्रवृत्तिं प्रति प्रामाण्यनिश्चयस्य हेतुताकांक्षी
मांसकैरभ्युपगतानां व्यभिचारो दर्शितः न च प्रामाण्यनिश्चयस्यानिष्कंपप्रवृत्तित्वं कार्यतावच्छेदकं प्रमाण्यसंदे-

गम
१७

हि निष्कंपप्रवृत्तिर्विजायते तस्मात्प्रवृत्तिसामान्ये प्रामाण्यज्ञानस्य हेतुतायां कल्पमिवाद् इति वाच्यं यत्र प्रामाण्य
स्य प्रामाण्यस्य सग्रहानेनात्मापति केवलजलादिविषयकं तत्रापि प्रवृत्तिदर्शनात् तथा च जलादिज्ञाने सति इदं ज्ञानम
प्रमेत्यप्रामाण्यज्ञानसत्त्वेऽप्रवृत्त्यदर्शनात् तत्संशयेऽसत्यपि प्रवृत्तिदर्शनात् अप्रवृत्तिं प्रत्यप्रामाण्यनिश्चयस्यैव प्र
तिबंधकत्वं कल्प्यते॥ ननु भावत्वेऽप्रामाण्यसंदेहकाले प्रामाण्यनिश्चयकाले प्रामाण्याप्रामाण्यज्ञानाभा
वकाले च प्रवृत्तिहेतुः अप्रामाण्यज्ञानाभावान्निष्कंपप्रवृत्तिसंशयकालेऽप्यप्रामाण्यनिश्चयाभावान्निष्कं
पप्रवृत्तिः स्यात् न त्वेकस्य सकंपत्वमन्निष्कंपत्वे फलसंदेहा। कालप्रवृत्तित्वानुवृत्तित्वरूपफलसंदेहसाम्यं जागर्ति न हि भा
वधानत्वात् न प्रवृत्त्यर्थं समाजग्रहत्वे अपि च प्रामाण्यज्ञानस्य हेतुत्वे तत्रापि प्रामाण्यज्ञानस्य हेतुत्वेऽनवस्था
ऽन्यथाऽप्रामाण्यनिश्चयस्यैव प्रतिबंधकतायामप्रामाण्यवत्त्विति तन्न कारकत्वं प्रामाण्यज्ञानस्या
प्रामाण्ये अप्रामाण्याभाववति प्रामाण्यप्रकारकत्वं निश्चयः अप्रामाण्याभाववति प्रामाण्यप्रकारक
त्वाभावप्रकारकत्वे सति प्रामाण्याभाववति प्रामाण्यप्रकारकत्वप्रकारकज्ञानत्वं प्रतिबंधकत्वं न चावः

कारणमिति महागौरवं अस्मन्मते तु अप्रामाण्यनिश्चये अप्रामाण्यज्ञानमात्रमुत्तेजकं अप्रामाण्यनिश्चय
सत्वेऽपि इदं ज्ञानं प्रमा न वेति न अप्रामाण्यसंदेहेऽपि प्रवृत्तिदर्शनात् तथा चाप्रामाण्यनिश्चयस्य अप्रामाण्यज्ञानमिदं
ज्ञानप्रामाण्यवदप्रामाण्यप्रकारकमित्याकारकं तच्च पूर्वोपदर्शितप्रामाण्यज्ञानेनाप्रामाण्यनिश्चयापेक्षया लाघवादिति
नैयायिकानामाशयः प्रामाण्यनिश्चयस्यैव प्रवृत्तिमात्रं प्रति हेतुता न तु ज्ञानानिश्चयस्यैव तत्तज्ज्ञानप्रामाण्य
निश्चयरूपत्वाद्वह्निकामस्य यत्र स्थले प्रामाण्यनिश्चयस्थलं अन्यथा ज्ञानस्याज्ञाने ज्ञानधर्मिकसंशयानु
पपत्तेरिति गाढं नो मीमांसकानां मतमनुसृत्य उपयति अत्र कश्चिदाहेति कश्चिदित्येकवचनं तु प्रामाण्यनिश्चय
स्य प्रवृत्तिहेतुकादित्वेन न्यायाण्यपि मीमांसकानां मैकाभिप्रायिकं अनुपादेयवचनं तथा अनादरसूचनार्थं
वचोऽर्थं अत्र च जलादिविषयकज्ञानप्रामाण्ये सामग्र्युपविषयकप्रथमज्ञाने विषयो न वेति संदेहे यतो विप्रतिपत्ति
र्बाधा ज्ञानत्वादेर्भावकोटिरिति प्रसिद्धिः प्रथमस्थलं च स्वागम्यविषयकज्ञानत्वं सामान्यकालोपस्थितिकत्वं प्रागेवेत्ये एम
वकारोऽपि अत्र क्रमोपात्तकप्रामाण्यमन्धपायैवेत्यर्थः ननु क्वचित् अप्रामाण्यसंदेहे ज्ञानकालीनप्रवृत्तिस्थले तन्निश्चयस्य १८

धर्मिवाद्यनन्तर्गतस्वत्वेनेति अत्र स्वत्वं स्वाश्रयस्वस्वकीयोभयपरत्वं तेन स्वात्मस्वकीयाश्रयज्ञानप्रामाण्यपदार्थः अ-
त्रस्वत्वमादिरिति प्रामाण्याश्रयीभूतज्ञाने नैकस्वनिष्ठप्रामाण्यं स्वग्राह्यत्वं इति गुरुमते तथाहि तन्मते सर्वस्मिन्नेव ज्ञाने मि-
तिर्मातामेयस्फुरतीति त्रितयं विषयीभवति घटत्वेन घटमहं जानामीत्याकारकमुत्पद्यते अत्र प्रामाण्यघटकीभूतघटत्व-
प्रकारत्व घटविशेष्यकत्वयोः स्वनिरूपणेः स्वप्रकाशात्मकेन स्वेनैव ग्रहणात् भवति प्रामाण्यस्य स्वतो ग्रहः अत्र
वत्वघटविशेष्यकत्वज्ञानत्वप्रकारकत्वादिकं पूर्वमनुपस्थितं तमेव भासते विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुतया स्वेत-
रेणाकारणात् इति त्रिपुटीप्रत्यक्षवादिनां प्रामाण्यग्रहः स्वस्वतस्त्वं स्वकार्यादि स्वस्वाश्रयविषयकत्वज्ञानादिरित्यर्थः तच्च
ज्ञाने मुरारिमिश्रमते अनुव्यवसायग्रहं यथा घटं पटं इति ज्ञाने जाते मनसा घटत्वेन घटमहं जानामीति ज्ञानविष-
यकं ज्ञानं जन्यते तत्र पूर्वोक्तरीत्या प्रामाण्यघटकीभूतपदार्थोपस्थितेः स्वकीयेन अनुव्यवसायेन ग्रहणात् प्रामाण्य-
स्य स्वतस्त्वं भाट्टानां मते स्वकीयार्थापत्तिरूपादनुमितिरूपाद्वेत्यर्थः तथाहि तेषां मते ज्ञानस्यातीन्द्रियस्य ज्ञाततोपत्त्य-
न्यथानुपपत्त्याकल्पनेन तत्र ज्ञाने भासमाने च स्वकप्रमाणप्रामाण्यमपि भासते इति स्वकीयेनार्थापत्त्यादिना ग्रहणात् प्रा-

गौ॰ त॰ १९ 19

माण्यस्य स्वतस्त्वमिति सिद्धेयः ननु यदि स्वविषयकानुमितित्वादिना प्रामाण्यग्रहेऽपि स्वतस्त्वं तदा नैयायिकमतेऽपि तद्
विरुद्धं इदं ज्ञानं प्रमेत्यादि तन्मतसिद्धप्रामाण्यग्राहकानुव्यवसायेऽपि तज्ज्ञानविषयकत्वादित्यत आह स्वस्यार्थ इति स्वत्रये
नेत्यस्य तज्ज्ञानाप्रामाण्यग्राहकमित्यनेनान्वित्य विशेषणान्तरं यत् तेनेदं ज्ञानं प्रमेति तज्ज्ञानाप्रामाण्यग्राहकस्य तज्ज्ञानग्राह
कस्य तज्ज्ञानप्रामाण्यग्राहकत्वेन व्याप्तिः एवं ज्ञानमित्यस्य विषयविशिष्टमिति विशेषणं ज्ञानं प्रमेयमिति शाब्दबोधस्य ज्ञा
नत्वेन ग्रहे तज्ज्ञानग्राहकस्य तज्ज्ञानप्रामाण्यग्राहकत्वेऽपि ना व्याप्तिः स्वत्वेन ज्ञानग्राहकत्वेन व्याप्यव्यापकभावो ग्राह्यते तथा
वत्तज्ज्ञानाप्रामाण्यग्राहकमित्यत्र सतिविषयविशिष्टतज्ज्ञानज्ञानग्राहकत्वव्याप्येन तज्ज्ञानप्रामाण्यग्राहकत्वं व्याप्यं क
मित्यर्थः ईदृशं च स्वतस्त्वं मीमांसकमतेऽपि ना ईदृशज्ञानविषयकज्ञानप्रामाण्यग्राहकत्वान्नैयायिकमते तु नास्त्येतादृशा
स्यानुव्यवसायस्य ग्रहणस्य प्रामाण्याभावेन प्रामाण्याग्राहकत्वात् नचेदं दर्शयति नास्तीति नन्विदमंशे तज्ज्ञानग्राहकानुव्यव
प्रामाण्यग्राहकत्वेऽनभ्युपगमे येन प्रतिबन्धोऽस्य यत्र तस्मान्नैयायिकमतेऽपि प्रामाण्यग्राहकानुमित्याद्यग्रहे तदा तज्ज्ञान राम १९
ग्रहणादिति चेन्नैवं ज्ञानग्राहकादित्यस्य प्रामाण्यविषयकादिति विशेषणात् एवं च तथाप्यसंगतिः प्रागमितिकमित्यस्य नैयायिकानुप

त्मकस्यापि प्रामाण्यग्राहकस्य मीमांसकस्य मतेन तथात्वानुपपत्ता मानस्य स्वमते तथात्वात् प्रमितेर्ज्ञापकत्वेः तथा च तत्प्रविष्टधर्मो विलक्ष
हितिकत्वं स्वमते त्वमते स्वमते हि वेत्यर्थो न तथा च प्राथमिकज्ञानग्राहको समात्रेन प्रामाण्यग्राहकमित्यर्थः प्राथमिकत्वं च पू
र्वोक्तं नैयायिकमतेन तथात्वमित्थं प्राथमिकेन ज्ञानेन सकलविप्रामाण्यग्रहादिति न काप्यनुपपत्तिः यथा ज्ञानधर्मस्य न
ताहश स्वसमानग्राहकत्वं तथा प्रामाण्यस्येति प्रतिपादयितुं ज्ञानधर्मस्येति विशेषणं तद्धर्मसत्वं स्वतन्त्रत्वमुपहरति नेनेति
प्राथमिकज्ञानाग्राहिकमात्रानपेक्षित्वमित्यर्थः प्राथमिकप्राथमिकज्ञानग्राहकत्वमिति निष्कर्षः यथाश्रुते तत्प्रामाण्यस्ये
त्यस्याप्रामाण्यग्रहस्येत्यर्थः ननु संशयोत्तरं पूर्वज्ञानग्रहेऽपि तेन प्रामाण्यग्रहः न च सर्वत्र ज्ञानग्रहे प्रामाण्यसन्देहो नाह
ज्ञानवेति विपक्षबाधकतर्कमाह कथमिति ज्ञानग्रहाभावे ज्ञाने प्रामाण्यसंशयाभावप्रसङ्गादिति अनधिगतेति ध
र्मिज्ञानस्य संशयहेतुत्वादिति भावः इदमुपलक्षणं प्रामाण्यसंशयान्तरस्थलेऽपि प्रामाण्यानुमितिरपि न स्यादिति ज्ञा
ज्ञानाभावादित्यपि बोध्यं ये तु प्रामाण्याप्रामाण्ययोर्ज्ञानाभावेऽपि कश्चित्प्रवृत्तिरिति न हि इदं तथा हि प्रामाण्यनिश्च
यस्याग्रहस्मिहेतुत्वेन प्रवृत्तिपूर्वं प्रामाण्यज्ञानवश्यकत्वं न चैवं कोऽकारणानां संभवति प्रामाण्यसंशयात् संभवेऽपि प्रथमम

मी·त·
२०

20

नभ्यासदशापन्नस्थले स्वसंभवान्न ज्ञप्तिपक्षानानोऽप्रामाण्यग्रहेणाव्यवहितस्समर्थप्रवृत्तिजनकत्वलिङ्गकानु
मितेः प्रवृत्त्युत्तरकालीनत्वादिति प्रवृत्तिपूर्वं नियमतः प्रामाण्यज्ञानासिद्धये प्रामाण्यपराहस्स्वतस्त्वमनुपग
मः तच्चानुपमते ज्ञानस्य स्वप्रकाशत्वात् स्वगृहीते ज्ञानमसिद्धं इति मतद्वये तु ज्ञानग्रहोत्तरमेव प्रवृत्तिस्तौकारात ज्ञा
नग्रहे च प्रामाण्यग्रहस्यावश्यकत्वात् प्रामाण्यग्रहं विनापि प्रवृत्तौ नासिद्धेः एतावतासामान्यतो मीमांसकमतत्रयासि
द्धं प्रामाण्यग्राहकस्य स्वतस्त्वप्रदर्शनेन स्वामामानतो दूषयित्वा न्यायेभट्टमानाभ्युपगतां ज्ञाततां दूषयितुमुप
क्रमते तस्मादिति यस्मात्प्रामाण्यनिश्चयं विना न प्रवृत्तिनिवृत्तिः तस्मादित्यर्थः प्रवृत्तेः पूर्वमेव प्रामाण्यं अर्थापत्त्या
ग्राह्यमित्येवं भवेत्यन्वयः तन्मते ज्ञानस्यातीन्द्रियत्वात् तज्जन्यज्ञातता या अनुमयानुपपत्त्या ज्ञानविषयिताया अर्थापत्तिः प्रमां
जनयते सा च प्रमा ज्ञानं विषयीकुर्वती ततः प्रामाण्यमपि विषयीकरोतीत्यर्थः प्रसन्नया जनितये त्यर्थः एतावता इति राम
गृह्यमाणाया इत्यर्थः एकदेशिमते विषयत्वेन न ज्ञातता न वा अर्थापत्तेः ज्ञाततया प्रभाकरमते ज्ञानं ज्ञानस्य ध्वंसेन भट्ट २०
मते विनेत्यायकानुमते प्रत्यक्षात्मामासान्तरेण ततः प्रामाण्यज्ञानाहित्यर्थः ज्ञानमात्रमिति मात्रपदेन प्रामाण्यव्यव

छेदः ग्रहत्वेन विषयताक्रियते अनुव्यवसायेनेति शेषः ततः अनुव्यवसायानंतरं फलदर्शनेनेति समर्थप्रवृत्तिजनक फ-
लजनकज्ञानेनेत्यर्थः अवधार्यते अनुमीयते सर्वस्मिन्नामांसकमते दूषयन्तो यच्छंति मतो भट्टानुयायिनां ज्ञानता दू-
षयितमाह ज्ञाततेति ज्ञाततानाम काश्चिद्धर्मश्च न्यायमते विकोभवति तेदय अथानुपपत्त्या ज्ञानेन गृह्यमाणो न न्यायमा-
ग्यमविमिदं ध्येत इति व तं शक्येत नन्तैव प्रमाणाभावादिति भावः सप्रकारकं दूषयेत तु मेव परमतं विविधं दर्शयति इदंकिंचे-
ति ज्ञानेन ज्ञाततेति न च तन्मते ज्ञानस्यातीन्द्रियतया इदमेवं कथं निश्चयादिति वाच्यम् घटविषयिण्यायत्र घटज्ञा-
नमनुमितं तदनंतरं ज्ञाततायाः प्रत्यक्षं तत्रैव ज्ञाततायाः प्रतिहेतुताग्रहसंभवात्स्मृतिसंधीयते प्रत्यक्षविषयताक्रियते इत्य-
र्थः तस्य जन्यत्वं साधयति ज्ञातेत्यत्र स्मृत्यतीतकालीनवृत्तिसंबन्धानविषयत्वेनेत्यर्थः तथा च ज्ञाततायाः योधर्मः सा
नोत्पन्न तात्कालोत्पत्तिकः न मूर्ततिकालानुपलभ्यमानत्वे सति तत्कालोपलभ्यमानत्वात्तत्कालोत्पत्तिकसं-
योगादिवदिति तात्पर्यं घटो अभिवार्यतावाणावविशेषणे इत्यलं शाकाशादौ न वारणाय विशेष्यं एवं जन्यत्वादिसि
जनके कल्पयति ये अन्वयव्यतिरेकाभ्यां मनसा ज्ञानजन्यत्वं निश्चीयत इति दर्शयति स्याचेति अथ ज्ञाततायाः

अभूत्वाभावित्वरूपकार्यविलक्षणहेतुना सहेतुकोऽनुमितोऽन्तराबाधात् तज्ज्ञानहेतुकत्वलाभः सुखादिज्ञानेऽन्या
नेनाहेतुत्वे व्यभिचारात् तज्ज्ञानतां प्रतिपक्षकारणाभावसाधारण्यं तस्यैव ज्ञानमिति संज्ञेति तात्पर्यं तथा चैतेन तत्कार्यकार्य
विलक्षणत्वेनेत्यर्थः तत्स्वरूपनाशेव ज्ञाने ज्ञानतत्त्वादिति ज्ञानत्वायस्य सहेतुकत्वमित्यर्थः इतराबाधप्रदर्शनायमचेति ज्ञानपू
र्वमितत्वेन घटादिरूपहेतुजन्यतामादाय सिद्धसाधनानिरासः यत्स्वत्वोऽपि यत्कार्यविलक्षणत्वे नजन्यहेतुसाध्यमित्यभि
प्रायः अन्वयव्यतिरेकाभ्यां विशिष्टज्ञानेनेत्यर्थः यद्वा अन्वयव्यतिरेकविशिष्टं तादृशज्ञानमित्युच्यत इत्यभिप्रायः
ज्ञानस्यातीन्द्रियतया अन्वयव्यतिरेकसहचारग्रहासंभवात् तत्र वधार्यते इतराबाधनसहकृतेन पूर्वोक्तानुमाने
न विषयीक्रियत इत्यर्थः अथ क्रमेण ज्ञानजन्यत्वं ग्रहेऽन्यथानुपपत्त्या अर्थापत्तिविषयतां ज्ञानस्य दर्शयति एव
मिति ज्ञानज्ञाततयोः कार्यकारणभावग्रहे सतीत्यर्थेन चेदर्थापत्तिरित्ति कारणभूताभावान्यथाऽनुपपत्तिं दर्शयति ज्ञा राम
नजन्योऽसाविति घटत्वविशेष्यकज्ञानजन्यत्वं घटविशेष्यकघटत्वप्रकारकज्ञानं विनाऽनुपपन्नमिति तादृशज्ञान २१
विषयत्वघटस्यार्थापत्त्या विषयीक्रियते तत्र च ज्ञाने प्रामाण्यघटकीभूतपदार्थोपस्थितेः प्रामाण्यमपीति भावः अ

द्धमतमुपसंहरति तेनेति ज्ञाततयेति कारणं विना अनुपपद्यमानेति विशेषः इदमुपलक्षणं घटो विशिष्टज्ञानविषयः वि
शिष्टज्ञाततावच्छेदकत्वात् यत्रैवं तत्रैवं यथा घट इत्यनुमितिः विनोक्तज्ञानोऽपि घट इति प्रतीतेः ज्ञानविषयत्वमेव विषयत्वमिति ज्ञा
ततायां प्रमाणाभावादित्याह ज्ञानविषयत्वेति न केवलं प्रत्यक्षप्रमाणेन ज्ञाततास्ति धयति किंतु ज्ञानविषयत्वान्यथा
नुपपत्त्यापि ज्ञाततास्ति घटेनाहं नन्विति ॥ अथेति न विषयविषयाभावेनेत्यर्थः घटज्ञानकोटिनिवेशमानेयि घटज्ञानस्यो
त्पत्तिविनाशदर्शनाद्घटकोशपेद इति ननु विषयतया ज्ञानजनकत्वमेव घटस्य ज्ञानविषयत्वमस्तीत्याह नद्रुत्यत्रेति
तस्मादित्यत्र इत्यर्थः ज्ञानविषयत्वान्यथानुपपत्तिरूपं ज्ञाततायां प्रमाणं दर्शयति तेनेदमिति अनुमीयते निश्चीय
ते अर्थापत्तिः ज्ञानजनिता किंचिद्धर्माधारत्वं विना घटस्य ज्ञानविषयत्वं अनुपपन्नमिति ताद्दशो धर्मो ज्ञातताख्यः
कल्प्यत इति भावः विषयितास्वरूपसंबंधविशेष इत्यभिप्रायेणाह स्वाभाविकेति ज्ञाततोत्पत्तिपक्षे दोषमाह इतर
थेति न चैतावता विषयत्वस्वरूपसंबंधस्याभावात्कथं विषयत्वमिति वाच्यं तथापि ज्ञानान्तरगतस्वरूपसंबंधसंभवात्
त् ते नपि चाहिनापुत्रादेः संबंधवज्ज्ञाततां प्रत्यधिकरणतया हेतुत्वं तु न संबंधं गतिपूर्वदर्शिताभावात् ज्ञानेस्वरूपत्वाद्वावि

षयविषयीभावसंबंधस्येति भावः ननु घटत्वादिधर्मेण नह्येव ज्ञानतावच्छेद्या स्वाश्रयाधिकरणत्वाद्धि रूपपरंपरासंबं
धेन तत्संबंधिनी ज्ञानविषयत्वमिति नातीतोद्देशेन विषयत्वहानिरित्यत आह किंचेति तत्रापि ज्ञानतायाश्चेपीत्यर्थः
अतीतादिगति ज्ञानतोभयस्येति शेषः अलौकिकोऽयमित्यत आह तथापीति स्वभावादेवेति अनतिरिक्तमिति शेषः तेन स्वभा
वानतिरिक्तं विषयत्वं स्वरूपात्मकमित्यर्थः ननु स्वरूपसंबंध इव तत्र विषयत्वस्वरूपं च ज्ञानत्वमित्युक्तो ज्ञानेऽप्यतिः पूर्वम
पि ज्ञातो घट इति प्रतीत्यनाश्रयाविषयस्य घटादेः सत्वात् अत्र ज्ञानस्वरूपं न तु ज्ञानविषयो घटस्वरूपायोगानुपपत्तेः
ज्ञानस्वरूपस्यैव विषयतानतिज्ञानस्यातीतदशायां ज्ञातो घट इति प्रतीत्याऽपपन्नमिति केनचित् ज्ञानमित्याह केचित्तन्न
(अर्थ) इत्यर्थः अप्रामाण्यप्रसक्तिरिति ज्ञानतान्यथानुपपत्त्या ज्ञानमात्रस्येव विकल्पप्रामाण्यप्रसंगाद् इति भावः ११न् इत्यत्र
(अर्थमाह ज्ञानेति ज्ञानमात्रग्राह्यकोटिरित्यर्थः अन्यथा सर्वस्यैव प्रामाण्यग्रहप्रसंगेन यावत्कलावधि अत्यानुपपत्तेः ()
(इदं च अस्मन्मतेऽपि अविरुद्धमिति द्रष्टव्यं इति स्वप्रामाण्यग्रहस्य पतितज्ञानं ज्ञानमात्रेति शेषः तेन ज्ञानमात्रग्राह्य कोटिर्नु) एम
(अवसायादिनेन अनुमानेऽप्रामाण्यं न (सं)तद् इति प्रामाण्यग्रहस्य परतस्त्वमिति भावः एतेन अनुव्यवसायस्य प्रामाण्य अग्र) २२

नुपपत्तिः ज्ञानस्वरूपत्वं वेद्याभावात् तत्त्वस्माद्विषयत्वमपि किं तत्त्वं अभिप्रेतं कस्मान्नित्यत्वे विषयस्वरूपं ज्ञेयो यद्येवात्रात्मं
गत्वं तत्र वक्तव्यं प्रामाण्यं ज्ञानानुपपत्तेः न स्वेव ज्ञानस्यानन्यात्म मात्रस्य व्यवच्छिन्नत्वेन तदेतस्मादभिप्रेतेति अथ वं हृ यते तस्मात्तस्म न
न स्मृतेरनन्यथासिद्धत्वेन प्रामाण्यग्रहे न भवतीत्याह स्मृत्यादिकेति तत्र मात्रे येति स्व प्रमासाधारण्य ज्ञानमात्रजन्य ज्ञानतामा
त्रे येत्यर्थः इदं वक्ताननतासथ्यानुपपत्त्या तन्नोपपादकं ज्ञानमात्रकल्प्यते न तु प्रमेति भावः ननु ज्ञानतां विशेषेणाप्रमितितया
हृ वेदाप्रमाविकल्पयितुं शक्यतः प्रवेश्यत आह ज्ञानतानां विशेषितो नेति ननु ज्ञानतायां प्रमाजन्यत्वरूपविशेषणं दत्तं तस्मिन्नर
हेतु तत्रादेव साध्यसिद्धेरनुमित्यसंभवः अन्यथाहेत्वोरेवाज्ञानादित्येव ज्ञानतावच्छिन्नतायां ग्रहरूपं रार्थेत्तासामान्ये
न प्रमायाव्येनेत्यर्थः कुत इति ये नैव ज्ञानं प्रत्यक्षेनैव तत्प्रामाण्यमपि तेनैव क्रमेण तत्त्वानयाहत्या प्रामाण्यं कुत इ
त्यर्थः ज्ञानतामात्रेण ज्ञानमात्रज्ञाने विप्रामाण्यग्रहात् ज्ञानत्वाह तस्य प्रामाण्यग्राहकत्वं अन्यथानुपपत्त्याभावादित्यर्थः अथ प्र
मितितासथ्यानुपपत्त्या प्रमाकल्पने तत्रैव प्रामाण्यस्य ज्ञानतत्वमित्यप्यत इति चेदप्रमितितासथ्यानुपपत्त्या प्रमाकल्पनं तदा
प्रामाण्यस्यापि ज्ञानत्वं स्यादित्याशंक्य नत्वाप्यमाह स्वयं केनाप्यविदित्याहि ज्ञानप्रमात्वेति प्रमारूपं ज्ञानं प्रत्यक्षेणेत्यत

गो.त ल्लदर्शनेनाभिव्यञ्जनतागुरुमतायो दूषितत्वात् हाद्दिरूढ्यमितितिको ध्येयं तथाहि अनुव्यवसायो नाम ज्ञानस्य मानसप्रत्यक्षं तच्च घ
२३ टादेः व्यवसायोपस्थितौ तत्ता द्वारा तत्संनिकर्षेण तेन ज्ञानेन विषयस्यापि घटत्वविशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्वरू
पस्य प्रामाण्यस्य पूर्वमनुपस्थितेः तेनैव भानं विशिष्टबुद्धौ विशेषणज्ञानस्य हेतुत्वात् तस्मादनुव्यवसायेन विषयविशिष्ट
23 ज्ञानमेव गृह्यते न तु ज्ञाने तत्प्रकारत्वं तद्गुरुमतेपि व्यवसायस्यैव अनुव्यवसायरूपत्वात् एतद्दर्शने तुल्यमेव एवम
नुव्यवसायस्य प्रामाण्यसंशये व्यवसायस्य प्रामाण्यनिश्चयात् अनुव्यवसायप्रामाण्यनिश्चयापेक्षायामनवस्थेति के
नावच्छेदेन ज्ञानग्राहकेणाग्रहणादित्यर्थः अप्रामाण्यमपीति ज्ञाननानात्वानुपपत्त्या ज्ञानमात्रग्राहकेणेति कविन्मामाण्य
स्याग्रहादिति भावः एतदस्य अर्थमाह ज्ञानेति ज्ञानमात्रग्राहकादित्यर्थः अन्यथा तद्व्यक्तिप्रामाण्यग्रहस्य ज्ञान
ग्राहकत्वान्न दूषणत्वानुपपत्तिरित्यत आह मतेपि अपिरह्यमिति दर्शयति ज्ञानं ह्यतिज्ञानमात्रेति शेषः तेन ज्ञानमा एम
त्रग्राहकादनुव्यवसायादेनैव अनुमानेन प्रामाण्यं गृह्यते न तु स्वतः प्रामाण्यग्रहस्य परतस्त्वमिति भावः एतेन अनुव्यवसाय २३
स्य प्रामाण्याग्रहेपि अनुव्यवसायान्तरं कल्प्यं तेन चाप्यनवस्थेत्यनवच्छेद्यमित्यपास्तमिति ॥ नव्या घटज्ञानस्याप्रामाण्यं तेने

वयात्वं घटज्ञानाप्रामाण्यज्ञानस्यापि तेनैव घटज्ञानेनैकं सुसंनेनकोटिप्रामाण्यानां घटज्ञानविषयत्वे विषयानु
वस्थानुरुमते नियमामांसकमतेपि अभ्यासदशापन्नस्य जलज्ञाने इदं ज्ञानं प्रमा न वेति संशयजननानुभवसिद्धसं
शयानुपपत्तिः संशयानुरोधेन धर्मिज्ञानस्यावश्यकत्वात् ज्ञानधर्मिग्रहे च तस्य प्रामाण्यस्यापि ग्रहात्कोटिनिश्च
यसत्वेन संशयासंभवात्॥ प्रामाण्यनिश्चयप्रयोजनं निष्फलत्वं नास्ति इति शोभते दर्शितं। एतन्मते ऊहकृत्वे गेकं ज्ञानं हि
मानस्य प्रमात्वे संदेहे तत्प्रामाण्यं पुनरनुमानेन निश्चितं लब्धम्॥ तत्र प्रामाण्यानुमाने हेतोः समर्थप्रवृत्तिजनकत्व
ज्ञानस्य समर्थप्रवृत्तिं हेतुं शंकितुमाह जलज्ञानानंतरमिति फलवत्ति जलप्राप्तिजनकाव्यापकफलवति तद्भिन्ने व्यर्थः
नेच्च तयोर्मध्ये समर्थेति अत्र समर्थेति भावः जनकसमर्थप्रवृत्तिजनकता संबंधेन ज्ञानधर्मिरूपतया इति प्रामा
ण्यमित्यस्य विवरणं यथार्थ्यं यथार्थमित्यर्थः अनुमानमेवाह विशेष्येति प्राथमिकज्ञाने प्रामाण्यसाधने अन्वये
दृष्टांताभावाद्व्यतिरेकव्याप्त्युदाहरति यदित्यादि ननु व्यतिरेकव्याप्तिरेव कथं भविष्यति साध्याप्रसिद्धावत आह अति

हिकस्याप्रामाण्यप्रसिद्धिरिति चेन्नैवं यत्र यत्र जलत्वाभाववद्विशेष्यकजलत्वप्रकारकत्वरूपमप्रामाण्यं तत्र समर्थप्र
वृत्तिजनकत्वाभाव इति व्यतिरेकव्याप्तिग्रहे व्यापकत्वाभाववत्समर्थप्रवृत्तिजनकत्वस्य ग्रहात्तथाप्यप्रामाण्यस्या
भावप्रामाण्याभावरूपत्वमिति व्यतिरेकिणा प्रसिद्धिः अत्र च यथार्थं जलत्वाने प्रामाण्याभावइत्यकार्यकार्यसाध्यविशे
ष्यकेऽनुमितिविशेषणताज्ञानाभावेन साध्यविशिष्टपक्षानुमितिसंभवात् इत्यवफाल्लभावरूपप्रामाण्यस्यापि
मानसादिवेद्य इति ध्येयं प्रमाणाभाव इति प्रामाण्याभावमात्रं इति युक्तम्नाइहं जलमिति भ्रमइत्यर्थः पक्षसाध्या
दिकं भिन्नमपुनर्वक्ष्यति अत्र चेत्यादिना फलवदित्युक्तेऽत्र समर्थप्रवृत्तिजनकं न हि जलत्वानत्वेन पक्षइत्यर्थः य
थार्थमिति यथार्थाभावरूपमित्यर्थः पूर्वोक्तयुक्तेः ननु प्रमाकरणत्वमिति प्रमाचकरणं च तयोर्भेदः दृष्टान्तः इति
न्यायेन प्रमात्वं करणत्वं च नाप्रामाण्यमित्यर्थः स्मृत्यामिति स्मृतेर्हि यथार्थप्रवृत्तिहेतुत्वेन साध्यं स्मृतिभिन्न राम
त्वात्प्रामाण्यत्वं प्रमाकरणत्वं नास्तीति व्यभिचारापत्तिरित्यर्थः न द्वितीय इत्यकाण्डं यथार्थानुभवाप्रस्तावेति न २५
व्यभिचारादिति भावः इदमुपलक्षणं प्रमाकरणत्वरूपप्रामाण्यं पक्षेऽबाधोपि केऽवधाः केवलेति यद्यप्यदृष्टान्तं प्रमासमर्थ

ऽस्तामात्रं शव्रत्स्वेच्छायां बुद्धेर्विच्छायत्नेः सुखस्यैवाग्रहात् दुःखस्य हंजानामात्मानमिमानस्योपलब्धिसंस्कारबुद्धिः स्तेः
सुखादिहेतूपगीतामविशेषस्य च प्रत्ययसंज्ञोवहंति। न इष्टुक्तं बुद्धान्तिउपलभातिज्ञानातिप्रत्पानि त्ते सुखे न हि
कस्याप्यर्थमेदं वेधो भवतिभीनानाव्रतेतीत्सुखे सुखो दुःखो वेति कोऽप्यनुभवति। तस्मादेतेषोपहानाम
प्रवृत्तिजनकत्वादित्यनुमानस्य स्वतन्त्रस्य सहशापत्ते ज्ञानयत्नकस्य न व्यतिरेकसत्त्वमेव पूर्वपक्षविपक्षयो
: प्रमाहृपहोतं तौ यो: सत्त्वात् तथापि स्वनभ्यासदशायां न सुखद्वेषाप्रामाण्यस्याग्रहणात् स्वव्यभ्यासेऽयद्दु
करीत्या व्यतिरेकव्याप्तेर्वपुरस्फूर्तिकतयानत्थापिधानेको ध्यं इष्टान्तेन स्वनभ्यासदशापन्नदृष्टान्तेनेत्यर्थः त
ज्ञातीयत्वेनेति समर्थः प्र॥ वृत्तिजनकत्वज्ञानीयत्वेनेत्यर्थः स्वव्यतिरेकेऽतिडभयसच्चारस्यैवगृहीतत्वादि
तिभावः सुभ्यासदशापन्नस्येति स्वतएवं स्वभ्यासदशापन्नस्य हेतो प्रवृत्तिपूर्वप्रमाणे न इति भवाद्युः स्वीक्रियते
सचनानुमितिहृव: समर्थप्रवृत्तिजनकस्य हेतोर्गृहीतत्वादेतः स्वतएव प्रामाण्यग्रहणादिति निष्कर्षं तज्ज्ञानीयस्य
तुल्यं सम्भवन्तुउपसंहरति पानइति ननु प्रामाण्यवत्तु व्यवस्याग्रहणं हस्त्रपतेमवी दुःकिमितिसंदेहेऽपि न [redacted]

गो० त०
२५
25

मित्यत्राह तामसेष्वेति युक्तानां योलेशाः संक्षिप्ताः सारभूताः भागस्तु किं पूर्वकवर्णा संक्षिप्य तत्र इति विशेषणं लेश
कीर्तकथमित्यत्राह वीलति उल्लेखापठेऽप्यत्र येशेषयुक्तिकथनेनासारासाराविवेकनाशेषग्रहणस्यासामर्थ्यादिति तस्य
स्य पुनर्न न्यूनतापि कुतो यो नस्यादिति भावः ननु तर्हि भवद्भिरेव किंचित्संक्षिप्य कल्पितमिति नेत्याह यन्नाहि ना
कथं शास्त्रमेधो भवेदित्याह यथाशास्त्रमिति किं यादि विशेषणां शास्त्रस्य सारभूतमेव वर्णितमिति भावः ॥ ६ ॥
इति प्रमाणपरिच्छेदः समाप्तः ॥ संवत् सप्ताह शतकत्रयाधिकतमे वर्षे विक्रमानुनामके संवत्सरे उत्तरायणे वसंतर
तौ चैत्रमासे शुक्लचतुर्दश्यां भौमवासरे लिखितं चेदं मोक्षपरमेश्वर काशीमध्ये स्वपठनार्थं शुभमस्तु

६०

राम
२५